CC-0.In Public Domain. Digitization by eGangotri

शक्तिसङ्गमतन्त्रम् ।

प्रथमो भागः ।

कालीखण्डः ।

१ भाग

३८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

GAEKWAD'S ORIENTAL SERIES

Published under the Authority of the Government of His Highness the Maharaja Gaekwad of Baroda

General Editor :
B. BHATTACHARYYA, M. A., Ph. D.,
Rājaratna

NO. LXI

शक्तिसङ्गमतन्त्रम् ।

प्रथमो भागः ।

कालीखण्डः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ŚAKTISAṄGAMA TANTRA

CRITICALLY EDITED WITH A PREFACE

BY

BENOYTOSH BHATTACHARYYA

M. A., Ph. D., Rājaratna

DIRECTOR, ORIENTAL INSTITUTE, BARODA

IN FOUR VOLUMES

VOL. I

KĀLĪKHAṆḌA

BARODA

ORIENTAL INSTITUTE

1932

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

PRINTED BY V. P. PENDHERKAR AT THE TUTORIAL PRESS
211 A, GIRGAON BACK ROAD, BOMBAY
AND
PUBLISHED ON BEHALF OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA
GAEKWAD OF BARODA BY BENOYTOSH BHATTACHARYYA,
DIRECTOR, ORIENTAL INSTITUTE, BARODA

Price Rs. 2—8—0

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

PREFACE

The first instalment of one of the most popular, one of the most authoritative and one of the most extensive Tāntric works of the Hindus known as the *Śaktisaṅgama Tantra* is now presented to the Sanskrit knowing public as No. LXI of the *Gaekwad's Oriental Series*. This work deals with the whole field of Tāntric culture and divides the subject matter under an amazing variety of topics. To the research scholar the portion dealing with the different Śaiva and Vaiṣṇava schools will be found to be of great interest, not only because the schools are found here elaborately defined, but also because it points out the broader and more minute differences existing amongst the different schools including the heterodox schools of the Jaina and Buddhist systems, and gives their peculiar religious tenets and dogmas. The work by reason of its wealth of information and variety of topics makes a very interesting reading and will prove useful to all those who are engaged in a critical and comparative study of the Tantras belonging to the two greatest religious systems of India: Hinduism and Buddhism. As this instalment comprising the Kālīkhaṇḍa only is a fraction of the entire work, a general introduction here seems to be quite uncalled for, and, therefore, this is reserved for some future occasion, when further portions of the work comprising the other three sections, namely, the Tārākhaṇḍa, Sundarīkhaṇḍa and the Chinnamastākhaṇḍa will also appear in print.

The *Śaktisaṅgama Tantra* is quoted extensively by Kṛṣṇānanda Āgamavāgīśa in his Tantrasāra, Umānandanātha in his *Nityotsava* and is referred to by name in the *Puṣparatnākara Tantra*, and in this last work the *Śaktisaṅgama Tantra* has been given the same place as the most authoritative works of the Hindu Tāntrics, such as the *Rudryāmala*, *Śāradātilaka*, *Merutantra*, *Manthāna-bhairava*, *Kulacūḍāmaṇi*, *Bhāvacūḍāmaṇi* and a host of others. This shows that in A. D. 1850 when the *Puṣparatnākara Tantra* was written, the *Śaktisaṅgama Tantra* had already acquired a

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

reputation of authority in Tāntric circles, and had become an object of veneration. Again, as Umānandanātha quotes from the work and as he flourished sometime in A. D. 1775, the *Śaktisaṅgama Tantra* seems to have been composed much earlier. Moreover, in the *Tantrasāra* of Kṛṣṇānanda Āgamavāgīśa, the *Śaktisaṅgama Tantra* is extensively quoted. This Kṛṣṇānanda was the disciple of Pūrṇānanda who in his turn was a disciple of Brahmānanda. Purṇānanda wrote a work, *Tattvacintāmaṇi*, which was composed in the Śaka year 1499 which corresponds to A. D. 1577; therefore, the time of Kṛṣṇānanda would be roughly A. D. 1607 if we take 30 years for one succession between a guru and his disciple. It becomes, therefore, apparent that in 1607 the present work *Śaktisaṅgama Tantra* was well known, and this may be taken as the *terminus ad quem* for the composition of the work.

In the *Śaktisaṅgama Tantra*, as has already been pointed out, ten names of Vaiṣṇava Schools are given and among them we notice the names of the Nimbārka, Rāmānanda, Rādhāvallabha and Harivyāsa schools, and these evidences enable us to fix the *terminus a quo* for the composition of the work. The year of Nimbārka's death has been put down approximately by Dr. R. G. Bhandarkar as 1162 A. D. and the date of Rāmānanda's birth as A. D. 1300. Harivaṁśa Goswāmī, the founder of the Rādhāvallabha sect of the Vaiṣṇavas, was born at Agra in Saṃvat 1559 or A. D. 1503. He belonged to the village Devavanavāsa in Saharanpur District, U. P. When he came up of age he went to Vṛndāvana, started a new sect and called it the Rādhāvallabha sect, the name being derived from the image of Rādhāvallabha given to him as a present by his father-in-law. He is reputed to have built a costly Maṭha at Vṛndāvana of Rādhāvallabha in Saṃvat 1641 which corresponds to 1585 A. D. when he must have been about 82 years of age.

Harirāma Śukla, the founder of the Harivyāsa sect of the Vaiṣṇava school belonged to Bundelkhand and was born in the year 1510 A. D. He was also known as Harivyāsa Muni and was the disciple of Śrībhaṭṭa and guru of Paraśurāma. He wrote a commentary on the *Daśaślokī* of Nimbārka, and at the age of 45

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

in A. D. 1555 went to Vṛndāvana and entered into the Rādhāvallabha sect founded by Harivaṁśa Goswāmī, and later on, started a new sect of his own which was known as the Harivyāsa sect.

As the present work, the *Śaktisaṅgama*, mentions these sects, it stands to reason that the work was written sometime after 1555 A. D. when Harivyāsa Muni went to Vṛndāvana, and this should, therefore, be considered the *terminus a quo* for the composition of the present work. It is reasonable, under the circumstances, to suppose that the present work was composed sometime between A. D. 1555 and 1607, and if we take the actual date of composition as *circa* 1581 A. D. it will not be very wide of the mark.

The popularity of the *Śaktisaṅgama Tantra* can be gauged from the number of extant MSS. of the work, and the different places where these are now obtainable. Copies of the work are available in the public and private libraries in Vizianagram, Rāmnātha Maṭha in the Madura District, Adyar, several places in Bengal, Nepal, Benares, Fyzabad, North West Province, Alwar, Bikaner, Baroda and Poona. Several MSS. of the same work have also migrated beyond the seas to be preserved in the Bodleian Library of Oxford and the India Office Library. The scripts employed in these MSS. are generally Nāgarī, Bengali and Nevārī in the case of Northern MSS.; the exact script used in the Southern MSS. is not available from the printed Catalogues where they are described, but it appears very probable that the Grantha character has been used in the MSS. found in the South particularly in the private collections in the Tamil country. Three among the twenty MSS. extant are dated, and the dates correspond to A. D. 1752, 1768 and 1820. Two commentaries of the *Śaktisaṅgama Tantra* are also known and these are found in private collections in the North Western Province and their authors are mentioned as Mukundalāla and Premanidhi.

A list of all extant MSS. of the *Śaktisaṅgama Tantra* and commentaries is given below with the name of the Library, their number of folia, script and reference wherever found:—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

EXTANT *MSS.* OF SAKTISANGAMA TANTRA

I. Text

No.	Library	Folia	Script	Reference	Remarks
1.	Adyar	37	Nāgarī	Catalogue of Sanskrit MSS. in the Adyar Library, Vol. II, p. 193	Incomplete.
2.	Deccan College B. O. R. Institute	103	...	Catalogue of MSS. in the Deccan College, p. 242	Khaṇḍa I. Paṭalas 21
3.	Bikaner Palace Library	202	Nāgarī	Catalogue of Sanskrit MSS. in the Library of His Highness the Maharaja of Bikaner, p. 606	Seems to be complete from the description.
4.	Bengal Government Collection (now under A.S.B.)	319	Bengali	Notices of Sanskrit MSS. No. I, p. 229	Dated Śaka 1674. A few chapters missing.
5.	Ulwar Palace Library	...	...	Catalogue of Sanskrit MSS. in the Library of His Highness the Maha Raja of Ulwar, p. 97	No. 2368
6.	Asiatic Society Collection	293	Bengali	Catalogue of Printed Books and MSS. in Sanskrit belonging to the Oriental Library of the Asiatic Society of Bengal, p. 191	I. B. 59
7.	Bodleian Library Oxford	26	Bengali	Catalogi Codicum Manuscriptorum, Vol. I. 102 a.	Incomplete 1820 A. D.
8.	India Office	81,83, 67	Nāgarī	Catalogue of Sanskrit MSS. in the Library of India Office, Vol. IV, p. 890	1768 A. D. comprising Kālī, Sundarī and Chinnamastā Khaṇḍas.
9.	Vizianagaram private Collection	...	...	List of Sanskrit MSS. in private Libraries of Southern India, Vol. I, p. 543.	No details available.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

No.	Library	Folia	Script	Reference	Remarks
10.	Rāmanāṭha Maṭha Madura District	...	...	The same, Vol. II, p. 231	No details available.
11.	Durbar Library Nepal	51,51, 54	Modern Nevārī	Not described	Comprises Kālī, Chinna mastā and Sundarī Khaṇḍas.
12.	Dacca University Library	9,334, 3	Bengali	Not described	Complete, contains besides a table of contents and another short Tāntric work in 3 leaves.
13.	Rājā Rāma Nātha Collection at Fyzabad	94	Nāgarī	Catalogue of Sanskrit MSS. existing in Oudh, 1875, p. 30	Pūrvārdha only.
14.	The same	92	Nāgarī	The same, p. 30	Uttarārdha.
15.	Pūrṇānanda Benares Collection	45	...	Catalogue of Sanskrit MSS. in North West Provinces, Part I, p. 226	Apparently incomplete. No details available
16.	North Western Province (?)	...	...	The same, Part II, 148	No details available
17.	The same	...	...	The same, Part V, 22	No details available
18.	Oriental Institute, Baroda	82,176, 54	Nāgarī	Not described	Comprising Kālī Tārā and Sundarī Khaṇḍas.
19.	The same	33	Nāgarī	Not described	Kālīkhaṇḍa, incomplete and very incorrect.
20.	The same	36	Nāgarī	Not described	Kālīkhaṇḍa, incomplete and very incorrect.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

II. COMMENTARIES

No.	Library	Commentator	Fol.	Script	Reference	Remarks
1.	Gopinātha Collection Benares	Mukundlāla	5	Nāgarī	Catalogue of Sanskrit MSS. in Private Libraries in N. W. P., Part I, p. 218.	Recent and incorrect notes on Śaktisaṅgama Tantra.
2.	The same	Mukundlāla	35	Nāgarī	The same Part I, p. 236.	
3.	North Western Province (?)	Mukundlāla	...	...	Part II, p. 44	No details available.
4.	The same (?)	Premanidhi	...	...	Part III, p. 36	Ditto

In preparing the present edition only four copies out of the 20 described above could be utilized and these copies hail from Baroda, Calcutta, Dacca and Nepal. These four manuscripts have been found to be fairly correct and complete with the exception that the Baroda manuscript is wanting in the Chinnamastā Khaṇḍa, while the Nepal manuscript is lacking in the Tārā Khaṇḍa. The text of the present Khaṇḍa is, however, found in all the four MSS. and these manuscripts do not seem to have been copied from the same codex, as noticeable difference can be discovered in readings.

The MSS. used in the present edition are detailed as under:—

B(aroda). MS. No. 5603 in the Baroda Oriental Institute consisting of 82, 176 and 54 leaves measuring $8\frac{1}{2}'' \times 6''$, not described in any Catalogue.

C(alcutta). MS. No. I. B. 59 in the Asiatic Society of Bengal consisting of 293 leaves bound in book form measuring $12\frac{1}{2}'' \times 9''$ and described in the Catalogue of Books and MSS. in Sanskrit belonging to the Oriental Library of the Asiatic Society of Bengal, p. 191.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

D(acca). MS. No. 346 consisting of 9, 334 and 3 leaves in three batches measuring $21\frac{1}{2}'' \times 4\frac{1}{2}''$ belonging to the University MS. Library, Dacca. This MS. bears a table of contents and marginal notes showing the restoration of mantras from their description given in the text. It is not described in any of the MS. Catalogues.

N(epal). MS. No. Ta. 26 in the Durbar Library, Nepal consisting of leaves 51, 51 and 54 measuring $5'' \times 6''$ and written in bold Nevarī characters of recent origin. This is also not described in the two volumes of the Nepal Catalogue of Mm. Haraprasād Śāstrī.

We are indebted to Bada Kaji Marichi Man Singh, C.I.E. of Nepal for his courtesy in lending the Nepal MS. and allowing it to remain with us for a long time; to Mr. G. H. Langley, Vice Chancellor of the Dacca University for his courtesy in lending the valuable MS. belonging to the University Collection; and to Mr. Johan van Manen, Secretary to the Asiatic Society of Bengal for his kindness in lending the manuscript in his charge. In editing this work, we have derived considerable help and advice from Swami Trivikrama Tirtha, and in proof correction Mr. K. Rangaswami of the Oriental Institute has rendered valuable assistance. To these gentlemen the present editor, therefore, remains very deeply indebted.

Baroda,
11th March, 1932

B. BHATTACHARYYA

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका

१.	ग्रन्थप्रवर्त्तनं नाम प्रथमः	१—१३
२.	कालनित्याविधिर्नाम द्वितीयः	१४—२६
३.	अष्टाष्टकनिरूपणं नाम तृतीयः	२७—४०
४.	पात्रनिर्णयकथनं नाम चतुर्थः	४१—५७
५.	ऋणिधनिचक्रविनिर्णयं नाम पञ्चमः	५८—६८
६.	नामविवरणं नाम षष्ठः	६९—८५
७.	कादिदीक्षाविवरणं नाम सप्तमः	८६—९२
८.	प्रदोषविधिर्नामाष्टमः	९३–१०३
९.	मेरुसंसाधनं नाम नवमः	१०४–११३
१०.	मेरुकथनं नाम दशमः	११४–१२०
११.	सिद्धमतरहस्यं नामैकादशः	१२१–१२६
१२.	सिद्धप्रयोगो नाम द्वादशः	१२७–१३४
१३.	वीरराव्यादिनिर्णयो नाम त्रयोदशः	१३५–१३८
१४.	ताराकल्पाङ्गसिद्धिर्नाम चतुर्दशः	१३९–१४२
१५.	मधुमतीसिद्धिविधिर्नाम पञ्चदशः	१४३–१४५
१६.	क्रमदीक्षाविधायको नाम षोडशः	१४६–१४९
१७.	सूत्रनिर्णयो नाम सप्तदशः	१५०–१५४
१८.	क्रमदीक्षापवित्रारोपणं नामाष्टादशः	१५५–१६०
१९.	उपाकर्मपवित्रारोपणरक्षाविधिर्नामोनविंशः	१६१–१६७
२०.	मदनारोपणं नाम विंशतिः	१६८–१७३
२१.	कामधेन्वादियोगो नामैकविंशतिः	१७४–१७९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्रीगुरुभ्यो नमः ।

श्रीशक्तिसङ्गमतन्त्रम् ।

कालीखण्डः ॥ १ ॥

प्रथमः पटलः ।

श्रीदेव्युवाच ।

अनादिरूप भूतेश शशिशेखर शङ्कर ।
देवाधिदेव विश्वेश विश्वाराध्य सुरेश्वर ॥ १ ॥
निरञ्जन निराकार नित्यानन्द गुणाकर ।
गुणातीत परस्वामिन् सर्वातीत परात्पर ॥ २ ॥
त्वत्सम्भूतं[1] जगत् सर्वं स्थावरं जङ्गमादिकम् ।
श्रुतानि सर्वतन्त्राणि लक्षकोट्यर्ब्बुदानि च ॥ ३ ॥
तन्त्रार्णवा[2]दिकं देव राजराजेश्वर प्रभो[3] ।
तन्त्रराजः श्रुतो देव नानाभेदाश्च संश्रुताः ॥ ४ ॥
रसायनं श्रुतं देव सिद्धयो विविधाः श्रुताः ।
शक्तिसङ्गमनामानं तन्त्रराजोत्तमोत्तमम् ॥ ५ ॥
सूचितं देवदेवेश मन्त्रसिद्ध्यभिधागमे[4] ।
न मह्यं कथितं देव संशयं छेदय प्रभो ॥ ६ ॥

[1] B D N त्वत्तः स्रुतं । [2] D तन्त्रवर्णा ° । [3] D ° रं प्रति । [4] D ° द्धविधायने ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चतुःखण्डेन संयुक्तं सर्वसारोत्तमोत्तमम् ।
तन्त्रं कथय देवेश सम्प्रदायक्रमागतम् ॥ ७ ॥
समग्रं तन्त्रराजेन्द्रं सापेक्ष[1]रहितं प्रभो ।
सम्प्रदायप्रभ्रष्टा[2]नां मार्गसन्दर्शकारकम् ॥ ८ ॥
कलौ सिद्धिप्रदं तन्त्रं कथयस्व मम प्रभो ।

श्रीशिव उवाच ।

तन्त्रराजः पूर्वमुक्तः खण्डाष्टकसमुज्वलः ॥ ९ ॥
पूर्वार्द्ध[3]मुत्तरार्द्ध[4] च सार्द्धद्वयसमन्वितः ।
पूर्वार्द्धे कादिसंज्ञं तु द्वितीयं हादिसंज्ञकम् ॥ १० ॥
कादौ तु वेदखण्डानि हादावपि चतुष्टयम् ।
प्रतिखण्डे[5] महेशानि त्रिसहस्रं च षट्शतम् ॥ ११ ॥
प्रत्यध्याये शत[6]श्लोकाः षट्त्रिंशत्पटलानि च ।
इत्येकं खण्डमित्युक्तमेवं खण्डाष्टकं विदुः ॥ १२ ॥
दिव्यौघ[7]रचितो ग्रन्थो[8] गुरुद्वारो[9] भविष्यति ।
शक्तिसङ्गमनामाख्यं[10] श्रीबृहत्तन्त्रराजकम् ॥ १३ ॥
वेदखण्डसमायुक्तं षष्टि[11]साहस्रिकं (!) शुभम् ।
दिव्यौघरचितं[12] तन्त्रं सर्वतन्त्रोत्तमोत्तमम् ॥ १४ ॥
अनादिकाल्या रचितं तारारूपं द्वितीयकम् ।
तृतीयं[13] सुन्दरीरूपं चतुर्थी छिन्नमस्तका ॥ १५ ॥
युगे युगे चन्द्र[14]संख्यं कलौ खण्डचतुष्टयम् ।
षट्शतीवत्सरान्ते तु द्विसप्तत्युत्तरं शिवे ॥ १६ ॥

[1] C °क्षा°। [2] D °भावा°। [3] C °द्धे। [4] C °द्धे। [5] C °ण्डं। [6] B °तं।
[7] B °धै। [8] B D यत्र। [9] B N °भावो। [10] C °नं। [11] D षड्भिः। [12] N °रक्षितं।
[13] B °ये तु। [14] B चेन्दु°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आविर्भवति देवेशि दिव्यौघद्वारतः शिवे ।
बौद्धपाषण्डनाशार्थं सम्प्रदायार्थमेव च ॥ १७ ॥
सम्प्रदायसंकराणां विनाशार्थमिहेश्वरि ।
सम्प्रदायस्थापनार्थं ब्राह्मण्यरक्षणाय च ॥ १८ ॥
मन्त्रशास्त्रस्य सिद्ध्य[1]र्थमाविर्भवति पार्वति ।
तन्त्रेषु कालिका तारा[2] सदा तिष्ठति पार्वति ॥ १९ ॥
अथोद्दण्डं[3] विधायेत्थं[4] श्रीमहादक्षिणेश्वरी ।
अनादिविद्या श्रीकाली महातारामिधा परा ॥ २० ॥
षट्शाम्भवेश्वरी[5] विद्या वाच्यातीता परा कला[6] ।
महाप्रलयमासाद्य कोटि[7]ब्रह्माण्डनायिका ॥ २१ ॥
शिवशक्तिमयं देहमेकीकृत्य सदा स्थिता ।
कोटिवक्त्रा[8] भवाद्यास्तु ब्रह्माणः प्रेतरूपिणः ॥ २२ ॥
तत्श्मशाने प्रनृत्यन्ति गायन्ति व्याल[9]सङ्कुलाः ।
चितिरक्षास्वरूपत्वं प्राप्य तिष्ठन्ति पार्वति ॥ २३ ॥
माहे[10]श्वराणामानन्त्यं[11] विष्णुरूपे[12]ऽप्यनन्तता[13] ।
शक्रा[14]दीनां तु गणना नास्त्येव प्रियवादिनि ॥ २४ ॥
नद्यां तु वालुका यावत्तावदिन्द्राः पुरेरिताः[15] ।
कोटिब्र[16]ह्माण्डपर्य्यन्तं स्थावरं जङ्गमादिकम् ॥ २५ ॥
एकैकवारमिन्द्रत्वं गतं तत्पुनरप्यलम् ।
अनन्तकोटिब्रह्माण्डे यावन्तः परमाणवः ॥ २६ ॥
तावन्तः सन्ति तद्भूमौ चितिधूलिस्वरूपतः ।
मा[17]हेश्वरीसमेतानां ब्रह्माण्डकोटिकोटयः ॥ २७ ॥

[1] B सिद्धा°, D रक्षा°। [2] B वीरा°। [3] C °ण्ड°। [4] D विराजेऽथं। [5] D °वेन्दु°। [6] B कुला°। [7] B D महा°। [8] D °ब्रह्मा। [9] B N C ध्यान°। [10] C N महे°। [11] N °न्त्ये। [12] D N °पो। [13] D N °कः। [14] D शास्त्रा°। [15] D प्रवेशिताः। [16] Mss कीटाद्ग°। [17] C म°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तत्र तिष्ठन्ति देवेशि चतुर्वेदाः शवाः स्मृताः ।
युगाश्च शवरूपेण[1] सप्तप्रेतगताः पराः ॥ २८ ॥
सामरस्यं समासाद्य सर्वरूपा हि पार्वति[2] ।
चिद्व्या[3]पकस्वरूपेण स्वयं च बिभ्रती पराम् ॥ २९ ॥
एतस्मिन्नेव काले तु स्वबिम्बं[4] पश्यति शिवा ।
तद्बिम्बं तु भवेन्माया तत्र मानसिकं शिवम् ॥ ३० ॥
सृष्टेरुत्पादनार्थं तु भर्तृरूपं प्रकल्पयेत् ।
आदिनाथं तु मनसा कल्पातीतस्वरूपिणम् ॥ ३१ ॥
तं विलोक्य महेशानि सृष्ट्युत्पादनकारणात् ।
आदिनाथं मानसिकं स्वभर्तारं प्रकल्पयेत् ॥ ३२ ॥
विपरीतरतिं कृत्वा महाशून्यं[5] विधाय च ।
त्रिंशदर्बुदषट्वृन्द[6]पञ्चाशत्पद्म[7]कोटयः ॥ ३३ ॥
युगानि परमेशानि विपरीतरताऽभवत् ।
विपरीतरतौ देवि बिन्दुरेकोऽभवत् पुरा ॥ ३४ ॥
तत्रैका सुन्दरी[8] जाता महालावण्यकालिका ।
श्रीमहासुन्दरीरूपं बिभ्रती परमा[9] कला ॥ ३५ ॥
तस्याश्च मानसी शक्तिस्तत्र जाता परात्परा ।
तस्या नाम महाकाली सुन्दरीति प्रकल्प्यते[10] ॥ ३६ ॥
तां विलोक्य महाकालो महामोहपरो भवेत्[11] ।
कालीं प्रति वदन् कालो वाणीं गर्वान्वितां पराम् ॥ ३७ ॥
बिन्दुध्वनिसकाशात्तु प्रत्येकं वर्णजातयः[12] ।
मातृकार्णास्तदा जाता अक्षरेति[13] तदाऽभवत् ॥ ३८ ॥

[1] D सर्वपशवः । [2] C सर्वे रूपाः समाहितम् । [3] C विन्दुव्या° । [4] C सद्बिम्बं° [5] N °शूलं । [6] D °च्छन्द° । [7] C सप्त° । [8] B सुमुखी, C N तु सखी । [9] N °या । [10] D N °ल्पयेत् । [11] B D N °परायणाम् । [12] B °शक्तयः, N °पातयः । [13] B D प्रत्यक्षेति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ध्वनिना व्याप्तमखिलं[1] जगदेतच्चराचरम् ।
अद्यापि देवदेवेशि कादम्बर्या ध्वनिश्रुतिः ॥ ३९ ॥
उवाच सुन्दरीं कालो महाप्राणप्रिये परे ।
त्रैलोक्यसुन्दरि श्रीशे कारुण्यामृतसागरे[2] ॥ ४० ॥
द्वितीयवाक्ये देवेशि कालीमुवाच[3] शङ्करः ।
महाघोरे शिवारावे क्रूरदंष्ट्रे करालिनि ॥ ४१ ॥
ललज्जिह्वे भीमनादे इत्येवं वचनं वदन् ।
ईदृशं वचनं श्रुत्वा निर्गुणा[4] परचण्डिका ॥ ४२ ॥
अनादिरूपा श्रीकाली मायोत्पादनतत्परा ।
कालो मोहवशं यातः श्रीकालीमायया शिवे ॥ ४३ ॥
अनादिसृष्टेरुत्पत्तिः[5] कारणार्थं महेश्वरि ।
ब्रह्माण्डानामथानन्त्यं तन्मया[6] कथितं क्षणात् ॥ ४४ ॥
कालस्य मायां दत्वा तु स्वयं व्यापारतां गता ।
कालस्तु चकितो[7] जातः सा वै कुत्र गता प्रिया ॥ ४५ ॥
हा हा प्राणप्रिया काली सा वै कुत्र गता प्रिया ।
इति मोहवशं यातः श्मशानाटनतत्परः ॥ ४६ ॥
हा हा प्राणप्रिया काली सा वै कुत्र गता प्रिया ।
एवं मोहवशं यातो भ्रान्त[8]चित्तस्ततो[9]ऽभवत् ॥ ४७ ॥
दर्शनार्थं तपस्तेपे पञ्चाशत्पद्म[10]कोटयः ।
युगानि तत्र जातानि न कालीदर्शनं शिवे ॥ ४८ ॥
कालस्य जातं देवेशि मार्गभ्रष्टपरायणः ।
इति ज्ञात्वा महाकाली ज्ञानं दत्तं महेश्वरि ॥ ४९ ॥

[1] D °निशं। [2] B °वर्षिणि। [3] D °लीश्वरो च। [4] B °ण°। [5] B °रूपरूपेति। [6] D N °न्मा°। [7] C °कितो°। [8] C श्रा°। [9] B °दा। [10] B ब्रह्म°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आकर्षणाख्या बुद्धिस्तु दत्ता कालस्य पार्वति ।
भक्तप्रीता महाकाली श्रीमहादक्षिणानना ॥ ५० ॥
वरदानेषु चतुरा तेनेयं दक्षिणा स्मृता ।
आकर्षणं कृतं तेन जातं तत्क्षणमात्रकम् ॥ ५१ ॥
काल्या ज्ञानं महेशानि मार्गच्युतिपरायणः ।
कालो जातो महेशानि महाभक्तप्रिया वरा ॥ ५२ ॥
शिवाकर्षणकं कर्म मिथुनत्वप्रदायकम्[1] ।
इति ज्ञात्वा महेशानि आगत्य तु शिवान्तिकम्[2] ॥ ५३ ॥
तदा समरसानां तु शक्तिं कृत्वा[3] महेश्वरि ।
आनीय दत्ता कालस्य मार्गाभ्यासार्थमेव तु[4] ॥ ५४ ॥
मार्गं विना महेशानि गतिरत्र कथं भवेत् ।
तत्राभ्यासपरः कालः कुण्डलीध्यानतत्परः ॥ ५५ ॥
मनुष्याणां कुण्डली तु सार्द्धत्रिवलया स्मृता ।
श्रीदेव्या[5] कुण्डली देवि[6] स्वेच्छया गुणिता शिवा ॥ ५६ ॥
त्रिगु[7]णा श्रीः त्रिशक्तिश्च यदा वेदगुणा भवेत् ।
चतुर्वर्णा चैकजटा चतुर्वेदे[8]श्वरी परा ॥ ५७ ॥
यदा पञ्चगुणा देवि महोग्रा तु तदा भवेत् ।
यदा षड्गुणिता[9] शक्तिः सिद्धिकाली प्रकीर्तिता ॥ ५८ ॥
यदा सप्तगुणा शक्तिः सप्तार्णा कालसुन्दरी ।
यदाष्टगुणिता शक्तिरष्टार्णा भुवनाम्बिका[10] ॥ ५९ ॥
यदा नवगुणा शक्तिः नवार्णा चण्डिकेश्वरी ।
यदा दशगुणा शक्तिर्दशविद्यास्वरूपिणी ॥ ६० ॥
यदा रुद्रगुणा जाता श्मशानकालिका भवेत् ।

[1] D N ममिथ्यात्वेकनायकं (?)। [2] B N °न्तरे। [3] B भूत्वा °। [4] D च।
[5] D °व°। [6] C शक्तिः। [7] C निर्गु०। [8] N °दी°। [9] D धातुगुणा।
[10] D तारणांत्मिका।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यदा सूर्य्यगुणा देवि[1] द्वादशी चण्ड[2]भैरवी[3] ॥ ६१ ॥
यदा कामगुणा देवि कामभेदा च तारिणी ।
चतुर्दशगुणा जाता वशीकरणकालिका ॥ ६२ ॥
यदा पक्षगुणा जाता महापञ्चदशी स्मृता ।
कलागुणा यदा शक्तिः श्रीमहाषोडशी तदा ॥ ६३ ॥
कलातीतगुणा देवि छिन्नमस्ता तदा भवेत् ।
अष्टादशगुणा देवि महामधुमती भवेत् ॥ ६४ ॥
ऊनविंशद्गुणा देवि महापद्मावती तदा ।
गुणिता विंशतिपदा विंशद्वर्णा रमा भवेत् ॥ ६५ ॥
एकविंशद्गुणा देवि प्रोक्ता श्रीकामसुन्दरी ।
द्वाविंशद्गुणिता देवि[4] दक्षिणाकालिका तदा ॥ ६६ ॥
त्रयोविंशद्गुणा देवि विद्येशीति तदा भवेत् ।
गुणिता तत्त्वसंख्याभिर्गायत्री स्यात्तदा शिवे ॥ ६७ ॥
पञ्चविंशद्गुणा देवि पञ्चमी सुन्दरी तदा ।
षड्विंशद्गुणिता शक्तिः षष्ठी विद्या प्रकीर्तिता ॥ ६८ ॥
सप्तविंशद्गुणा देवि महारत्नेश्वरी परा ।
अष्टा[5]विंशतिधा सा वै गुणिता परमा कला ॥ ६९ ॥
अष्टविंशाक्षरी विद्या मृतसञ्जीवनी परा ।
ऊनत्रिंशद्गुणा देवि महानीलसरस्वती ॥ ७० ॥
त्रिंशद्गुणा यदा विद्या वसोर्धारा तदा स्मृता ।
एकत्रिंशद्गुणा देवि त्रैलोक्यमोहिनी भवेत् ॥ ७१ ॥
द्वात्रिंशद्गुणिता चेत्स्यात्[6] त्रैलोक्यविजया स्मृता ।
त्रयस्त्रिंशद्गुणा चेत्स्यात् श्रीमत्कामाख्यतारिणी[7] ॥ ७२ ॥

[1] D शक्तिः । [2] B चान्द्र° । [3] D वीरविद्यास्वरूपिणी । [4] C D N विद्या ।
[5] D °ष्ट° । [6] B चैषा । [7] C श्रीकामदायिनी स्मृता; D श्रीमती कोमभाषिणी ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चतुस्त्रिंशद्गुणा शक्ति[1]रघोराख्या तदा भवेत्[2] ।
पञ्चत्रिंशद्गुणा देवि सङ्गीतमोहिनी भवेत्[3] ॥ ७३ ॥
षट्त्रिंशद्गुणिता विद्या बगलाख्या[4] तदा भवेत् ।
सप्तत्रिंशद्गुणा शक्तिः प्रोक्ता विद्या त्वरुन्धती[5] ॥ ७४ ॥
अष्टत्रिंशद्गुणा चेत् स्यादन्नपूर्णेश्वरी मता ।
गुणितोनचत्वारिंशत् ना[6]कुली परिकीर्त्तिता ॥ ७५ ॥
चत्वारिंशद्गुणा शक्तिः प्रोक्ता विद्या त्रिकण्टकी ।
गुणिता चैकचत्वारिंशत्तदा राजेश्वरी कला ॥ ७६ ॥
द्विचत्वारिंशद्गुणिता[7] त्रैलोक्याकर्षिणी[8] तदा ।
त्रिचत्वारिंशद्गुणिता राजराजेश्वरी स्मृता ॥ ७७ ॥
चतुश्चत्वारिंशद्गुणिता कुक्कुटी परिकीर्तिता ।
चत्वारिंशद्बाणगुणा सिद्ध[9]विद्या प्रकीर्त्तिता ॥ ७८ ॥
चत्वारिंशद्रसगुणा प्रोक्ता श्रीमृत्यु[10]हारिणी ।
चत्वारिंशन्मुनिगुणा महाभोगवती[11] मता ॥ ७९ ॥
चत्वारिंशद्वसुगुणा वासवी परिकीर्तिता ।
चत्वारिंशद्रन्ध्रगुणा फेत्कारी[12] परिकीर्तिता ॥ ८० ॥
पञ्चाशद्गुणिता देवी महाश्रीमातृसुन्दरी ।
पञ्चाशच्चन्द्रगुणिता मातृकोत्पत्तिसुन्दरी ॥ ८१ ॥
एकैकं[13] मातृकावर्णं प्रतिविद्याप्र[14]काशतः ।
उत्पन्ना परमेशानि स्वोत्पत्तिषु परायणा ॥ ८२ ॥
यो भावो यस्य वै प्रोक्तस्तद्भावे संस्थिता[15] परा ।
स्वेच्छया वलयं कृत्वा[16] यथा कुण्डलिनी[17] स्थिता ॥ ८३ ॥

[1] D देवि । [2] B तवाभवत् । [3] B प्रोक्ता शक्तिः विद्या त्वरुन्धती । [4] B सा । [5] B सङ्गीतमोहिनी भवेत् । [6] B न° । [7] B adds शक्तिः । [8] B °र्षणी° । [9] B °द्धिं° । [10] C °मत्प्र° । [11] B C N °मंती° । [12] D फट्कारी° । [13] N °क° । [14] B D स° । [15] D सहिता° । [16] B भूत्वा° । [17] D कुतूहली ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तथा विद्या सुसंजाता अक्षोभ्यमुनिरूपिणी ।
सार्धत्रिवलया देवि मनुष्यस्य प्रकीर्त्तिता ॥ ८४ ॥
एवं विद्या समुत्पन्ना कुण्डलीतो महेश्वरि ।
बालाम्बा[1] तु ततो जाता पूर्वाभ्यासार्थमेव तु[2] ॥ ८५ ॥
पूर्वाभ्यासप्रभावेन सुन्दरी पतिता भवेत् ।
स कालत्वं च संप्राप्तः[3] सुन्दरीसामरस्यतः ॥ ८६ ॥
विद्यया पंचमीरूपं धृत्वा कालसमागमः ।
भक्तप्राणप्रिया देवि तस्य सङ्गपरायणा ॥ ८७ ॥
पंचमीरूपमासाद्य संस्थिता परमा कला ।
तस्याः सङ्गाभ्यासयोगात् महाकालत्वतां गतः ॥ ८८ ॥
येन दृष्टा तु या पूर्वं स तस्या ऋषिरी[4]रितः ।
उपासकास्तदान्ये स्युरिति संक्षेपतो मतम् ॥ ८९ ॥
अथातो ब्रह्म देवेशि व्याख्यास्यामि यथाक्रमम् ।
बीजाङ्कुरस्फटिकजं तद् ब्रह्म परिकीर्त्तितम् ॥ ९० ॥
तदेव[5] ब्रह्म चा[6]ख्यातं कालकाली[7]मयं परम् ।
यावद्द्विवर्णितुं शक्यं तावत् सगुणतां[8] गतम्[9] ॥ ९१ ॥
तदेव सगुणं ब्रह्म वर्णना[10]शक्तिगोचरम् ।
वर्णना[11]यामशक्तिर्हि[12] यदा[13] जाता महेश्वरि ॥ ९२ ॥
तदेव निर्गुणं प्रोक्तं सगुणं वाच्यगोचरम् ।
वाग्भवं मुखमित्युक्तं मुखादुच्चार्यते च तत् ॥ ९३ ॥
अवाच्यं यद् भवेत् ब्रह्म तत्कथं मुखगोचरम् ।
वाक्शक्त्या[14] यन्त्रितं तच्च[15] तस्माच्छक्तेः प्रधानता ॥ ९४ ॥

[1] D °लात्मा । [2] D तत् । [3] MSS generally read न कालस्तो च संप्राप्य । [4] D कैविरी° (?) । [5] N °दिदं; C °दिन्द्र° । [6] B व्या° । [7] B N °ल° । [8] C गुणितं । [9] N °गभूः; D प्रसूः । [10] D निर्वाण° । [11] B °नी° । [12] B महाशक्तिः । [13] B सदा° । [14] D °शब्दा । [15] B D यंश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

काली माया तु सा शक्ति[1]र्बिम्बाद्यप्रति[2]बिम्बका[3] ।
कालीव्यापकसच्छाया महाकालः प्रकीर्त्तितः ॥ ९५ ॥
महाकालात् भवेन्माया सा प्रोक्ता[4] भुवनेश्वरी ।
ब्रह्मविष्ण्वा[5]दयो देवि तत्रोत्पन्ना महेश्वरि ॥ ९६ ॥
लोकपालास्ततो जाता वाग्भवा मातृकाः स्मृताः ।
अथैकगुणिता देवि प्रथमाक्षरसम्भवा ॥ ९७ ॥
अविनाशत्वलोपेन [6]तेन चाक्षररू[7]पता ।
शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यते ॥ ९८ ॥
सर्वाद्या तु भवेच्छ[8]क्तिरानन्दघनगोचरा ।
ब्रह्मरूपचिदानन्दा परब्रह्मैव केवलम् ॥ ९९ ॥
प्रकृतौ विद्यमानायां विकृतिर्न बलीयसी[9] ।
प्रकृतिः परमा शक्तिर्विकृतिः प्रतिबिम्बता[10] ॥ १०० ॥
आद्या कृष्णा महाकाली द्वितीया सुन्दरी स्मृता ।
रक्तवर्णा महेशानि तृतीया बालभैरवी ॥ १०१ ॥
चतुर्थी पंचमी विद्या यस्याभ्यासात्तु कालताम् ।
प्रपञ्चमूला सा शक्तिः[11] प्रपञ्चेशी प्रकीर्त्तिता ॥ १०२ ॥
तन्मायारूपधारित्वं प्रपञ्चात्मा[12] शिवो[13] भवेत् ।
त्रिनेत्रा त्रिगुणा जाता त्रिगुणात्मा तथेश्वरः ॥ १०३ ॥
ततः सदाशिवो जातस्तत्कृपालेशतः शिवे ।
तत्रस्था परमेशानि सौन्दर्यगुणसंयुता ॥ १०४ ॥
सुन्दर्यास्तु प्रपंञ्चोऽस्ति निर्गुणेन प्रपञ्चता ।
आद्या श्रीर्निर्गुणा काली वाच्यातीता परात्परा ॥ १०५ ॥

[1] B प्रोक्ता । [2] B व्यक्ति° । [3] B D N °तः । [4] B शक्तिः°; D जाता । [5] B विद्या°, D बिम्बा° । [6] D न only । [7] D स्वरू° । [8] D तावच्छ° । [9] C निलीयते । [10] C °जा । [11] D सिद्धिः । [12] D °द्वा । [13] D °वे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रकर्षेण तु पंचानां संयोगो युगपद्भवेत् ।
प्रपञ्चेशी तेन विद्या सुन्दरी परिकीर्त्तिता ॥ १०६ ॥
यदारभ्य धृतं रूपं सुन्दरं सुमनोहरम् ।
तदारभ्य प्रपञ्चोऽयं संजातः परमेश्वरि ॥ १०७ ॥
शक्तिकोणे महेशानि ब्रह्माण्डानामनन्तकम् ।
सर्वं तिष्ठति देवेशि जगदेतच्चराचरम् ॥ १०८ ॥
तस्याः[1] कुण्डलिनी शक्तिरक्षोम्यनागरूपिणी ।
स्वेच्छया गुणिता देवि स्वेच्छावर्णस्वरूपिणी ॥ १०९ ॥
ब्रह्माण्डगोले देवेशि काल्या तस्यै प्रदर्शितः ।
ब्रह्मगोलो विष्णुगोलो रुद्रगोलस्तृतीयकः ॥ ११० ॥
लोकेशगोलो देवेशि देवगोलस्ततः[2] शिवे ।
ततो हि ऋषिगोलो हि क्रमाद्गोला[3]श्च कोटिशः ॥ १११ ॥
परब्रह्माच्च प्रकृतिः प्रतिबिम्बस्वरूपिणी ।
महत्तत्वं ततो जातं अहङ्कारस्ततः परम् ॥ ११२ ॥
आकाशस्तु ततो जातस्ततो वायुः प्रकीर्त्तितः ।
ततोऽग्निश्च प्रजातोऽत्र अग्नेरापः प्रकीर्त्तिताः ॥ ११३ ॥
पानीयात् पृथिवी जाता ततश्चौषधयः शुभाः ।
ओषधीभ्यो भवेदन्नं अन्नात् प्राणः प्रकीर्त्तितः ॥ ११४ ॥
प्राणाज्जीवो हि सञ्जातो जीवात्मपरमात्मकौ ।
ब्रह्मबिम्बात्सर्वमेतज्जगदेतच्चराचरम् ॥ ११५ ॥
अत एव भवेद्ब्रह्म जगदेतच्चराचरम् ।
भावनावशतां यातो ब्रह्मरूपः सनातनः ॥ ११६ ॥
जीवः कीटस्ततो भृङ्गी भृङ्गी कीटो न वै शिवे ।
जीवो ब्रह्म पुनर्ब्रह्म ततो[4] ब्रह्म पुनश्च सः[5] ॥ ११७ ॥

[1] D °स्य । [2] B °श्च । [3] D °ल° । [4] B °स्ततो, N यतो ।
[5] B D पुनः पुनः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पुण्यद्रवात् पात्रयोगात् वह्नौ चोष्णात्मकं यथा ।
केवलं तु जलं देवि यदि वह्नौ प्रदीयते[1] ॥ ११८ ॥
वह्निनाशो भवेद्देवि नात्र कार्य्या विचारणा ।
देहपात्रस्य संयोगात् परमात्मा च देवता[2] ॥ ११९ ॥
सौख्यं दुःखं जयो लाभोऽहङ्कारो दम्भ एव च ।
मोहः कामः क्षुधा जृम्भा पिपासा स्पर्शनं गतिः ॥ १२० ॥
सर्वमेतन्महेशानि तद्व[3]ज्ज्ञातं महेश्वरि ।
तत्र[4] ज्ञाने समुत्पन्ने न सौख्यं न च दुःखता ॥ १२१ ॥
देहाभिमाने गलिते विदिते परमात्मनि ।
न सौख्यं न च वै दुःखं परब्रह्मैव केवलम् ॥ १२२ ॥
यथा दा[5]ह्यो वह्निशक्तिर्वह्नौ तिष्ठति पार्वति ।
तद्वद्ब्रह्म जीवमात्रे सदा तिष्ठति पार्वति ॥ १२३ ॥
विस्फुलिंगा यथा वह्नेर्नानास्थलगता भवेत् ।
जले नाशत्वतां यान्ति[6] तृणे वार्द्धिष्णुता भवेत्[7] ॥ १२४ ॥
काष्ठे स्फुलिंगतां यान्ति जीवे ब्रह्म तथा शिवे ।
पात्रयोगात् सर्वमेतत् जयलाभादिकं शिवे ॥ १२५ ॥
न सौख्यं न च वै दुःखं परब्रह्मैव केवलम् ।
तज्ज्ञानं मन्त्रयोगेन स्फुटं भवति पार्वति ॥ १२६ ॥
कामक्रोधादिभिर्युक्ते जीवरूपे परात्मनि ।
अन्ययोगात्[8] महेशानि दुःखं भवति नान्यथा ॥ १२७ ॥
मनोऽन्यत्र शिवो[9]ऽन्यत्र कथं योगो भवेत् शिवे ।
अन्ययोगे समारब्धे स्त्रीसङ्गश्चेयदा भवेत् ॥ १२८ ॥

[1] B प्रदापयेत् । [2] B °मात्माच्च जीवतां । [3] B त्त्वा° । [4] B तत्त्व° । [5] CN दे° । [6] CN °ति । [7] N वह्निं हुताशिने; B शिवे । [8] B N °गे । [9] N °वा° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विनाशाद्वायुरोधस्य देहनाशादिकं भवेत् ।
मन्त्रयोगे भावनायां न तथा परमेश्वरि ॥ १२९ ॥
यावद्धि भावना जाता तावद्देवो महेश्वरः ।
भावना गलिता चेत् स्यात्तदा जीवेश्वरो नरः ॥ १३० ॥
अत्रैव नियमो नास्ति तत्रावधिः प्रकीर्त्तितः ।
परब्रह्माथ[1] वा जीवो द्वयोरेकतरः शिवे ॥ १३१ ॥
[2]इति संक्षेपतः प्रोक्तं अकाराक्षरतत्त्वकम् ॥

इति श्रीशक्तिसङ्गममहातन्त्रराजे उत्तरभागे प्रथमखण्डे श्रीमदक्षोभ्यमहोग्रतारासंवादे ग्रन्थप्रवर्त्तनं नाम प्रथमः पटलः ।

[1] B °ह्मोऽपि । [2] C ततः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

द्वितीयः पटलः ।

उग्रतारोवाच ।

अक्षोभ्य श्रोतुमिच्छामि यत् पूर्वं सूचितं त्वया ।
तन्मे कथय देवेश यद्यहं तव वल्लभा ॥ १ ॥

अक्षोभ्य उवाच ।

रहस्यातिरहस्यं च महोग्रे शृणु साम्प्रतम् ।
ब्रह्मभूम्यन्तकं प्रोक्तं भूमिब्रह्माण्डकं[1] शिवे ॥ २ ॥
संहारे जायते देवि तत्र लीनं जगद्भवेत् ।
चतुर्वक्त्रविधिं देवि प्रमुखीकृत्य शाश्वतम् ॥ ३ ॥
कोटिवक्त्रा[2]न्तपर्य्यन्तं[3] ब्रह्माणः सन्ति गोलके[4] ।
चतुर्वक्त्रं तु भूगोलं ब्रह्माण्डाख्यं च कोटिजे ॥ ४ ॥
ब्रह्माण्डानामथानन्त्यमेवं तिष्ठति पार्वति ।
अनन्तकोटिब्रह्माण्डनायिका नीलशारदा[5] ॥ ५ ॥
ब्रह्मगोलं च तदधः सुन्दरीगोचरं भवेत् ।
भूगोलं परमेशानि भुवनागोचरं भवेत् ॥ ६ ॥
अधिकारो हि संदत्तः[6] सुन्दर्य्या एव पार्वति ।
महाविद्या कोटिसंख्या तन्मध्ये गोलगोचरा ॥ ७ ॥
अथ वै राजराजेशी महापरमसुन्दरी ।
एकस्मिन् समये देवि गोलोत्पत्तिपरायणा ॥ ८ ॥
तस्या[7] द्वारि महेशानि सर्वं[8] तिष्ठति पार्वति ।
न्यासजालादिकं देवि पंचाङ्गा[9]नामनेकशः ॥ ९ ॥

[1] N °के । [2] C चक्रा° । [3] B °न्ता । [4] C °कं । [5] B कालदक्षिणा ।
[6] B संहर्तुं । [7] N तस्याम । [8] N °र्वे । [9] N °र्गा° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तथैव निर्म्मितं देवि कालिकाज्ञानुसारतः ।
प्रत्यहं क्रियते यद्यत्तत् सर्वं कालिकाग्रतः ॥ १० ॥
गत्वा च कथ्यते देवि सुन्द[1]र्य्या नित्यमेव तु ।
कालीतारामयं ब्रह्म तदग्रे कथ्यते शिवे ॥ ११ ॥
भूगोलो हि महेशानि त्रि[2]स्कन्धे सूचितो मया ।
ममैव लेशसंजाता मुनयः शङ्करादयः ॥ १२ ॥
चित्त[3]स्कन्धे महेशानि ब्रह्माण्डाख्यः प्रकीर्त्तितः ।
भूगोलानां च पंचाशत् कोटिसंख्या महेश्वरि ॥ १३ ॥
न्यूनं[8] पंचसहस्रैस्तु ब्रह्माण्डगोलके भवेत् ।
पंचाशच्छतविस्तीर्णो भूगोलः परिकीर्त्तितः ॥ १४ ॥
भूगोलस्तु महेशानि कदम्बकुसुमप्रभः[4] ।
सदा भ्रमति देवेशि क्रियापंचक[5]संयुतः ॥ १५ ॥
घटाकारो महेशानि ध्रुवद्वयसमन्वितः ।
दक्षध्रुवे मुखं देवि वामे बुध्न[6]मुखाकृतिः[7] ॥ १६ ॥
कम्बुग्रीवो घटः प्रोक्तः श्रीचक्रकलशः स्मृतः ।
विंशत्संख्यादयः शब्दाः सदैकत्वे व्यवस्थिताः ॥ १७ ॥
शतान्तान्ता निगादिता संख्या साहस्रलक्षके[8] ।
दशसंख्या प्रयोक्तव्या कोट्यादौ शतमात्रकम् ॥ १८ ॥
अर्बुदे तु सहस्रं स्यात् खर्वे लक्षाभिधं भवेत् ।
एवं क्रमेण देवेशि परार्धान्तं महेश्वरि ॥ १९ ॥
अक्षरादि[9]समायुक्तो दक्षे न्यूना भवेच्छिवे ।
उत्तरे त्वधिका देवि यथायोगेन योजयेत् ॥ २० ॥

[1] B °वी° । [2] D N चतुः° । [3] N पुनः । [4] C D कदन्नकप्रसः परः । [5] D °बन्धक° । [6] C °तूद्र्ध्वं°, D बुध° । [7] Except C all the MSS. add a line: वामे बुधं (ध्नं in N B) महेशानि दक्षे बुध (ध्न in B N) मुखाकृतिः । [8] D °का । [9] B N अक्षोभ्यादि°, D अख्यादश° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कदम्बकुसुमं देवि श्रीचक्रवाटिकागतम् ।
तद्वाटिकासेचनार्थं कम्बुग्रीवायुतो घटः ॥ २१ ॥
छत्राकारेण देवेशि परितो ब्रह्म[1]गोलकम् ।
तत्तद्विम्बे[2] महेशानि महाश्रीचक्रनायिका ॥ २२ ॥
सदा तिष्ठति देवेशि नात्र कार्य्या विचारणा ।
परमाणुरणुश्चैव द्व्यणुकत्र्यणुक[3] एव च ॥ २३ ॥
लवस्त्रुटिः कला काष्ठा निमेषः श्वास एव च ।
ततः क्षणं महेशानि ततश्चैव पलं भवेत् ॥ २४ ॥
तत्षष्टिसंख्या नाडी स्यादिति संक्षेपतो मतम् ।
घटिका च मुहूर्त्तश्च प्रहरो दिवसस्तथा ॥ २५ ॥
अहोरात्रस्ततः[4] पक्षो मासश्चैव तत ऋतुः ।
अयनं वत्सरयुगे प्रलयश्चतुरात्मकः ॥ २६ ॥
चतुर्युगानामेकं हि महद्युग[5]मितीरितम् ।
एकसप्ततिभिश्चैव मनुरेकः प्रकीर्त्तितः ॥ २७ ॥
चतुर्दशैव सप्तत्या मनवस्तु चतुर्दश ।
इन्द्राश्चतुर्दश शिवे तथैव परिकीर्त्तिताः ॥ २८ ॥
चतुर्युगसहस्राणि ब्रह्माहः परिकीर्त्तितम् ।
तावद्युगानि वै रात्रौ दिवा इन्द्राश्चतुर्दश ॥ २९ ॥
वृक्ष[6]कीटे प्रस्तराश्च[7] तृणानि क्रमयस्तथा ।
ब्रह्माण्डगोले[8] यत्किञ्चित् जातं संजायमानकम् ॥ ३० ॥
एकैकवारमिन्द्रत्वं तेषां च परिकीर्त्तितम् ।
कीटात्[9] ब्रह्माण्डपर्य्यन्तं प्रपञ्चार्थं भविष्यति ॥ ३१ ॥

[1] B °यान°। [2] B N तद्विन्दौ च। [3] D N °कः। [4] B तथा।
[5] महायुग may be suggested. [6] D ब्रह्म°। [7] B °यश्च। [8] D ब्रह्मगोले च।
[9] D °ट°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मनवस्तु तथैवोक्ता[1] पक्षश्चैव तथा[2] भवेत् ।
मासर्त्तुश्च महेशानि त्वयनं हायनं ततः ॥ ३२ ॥
एवं हि शतवर्षाणि ब्रह्मायुः परिकीर्त्तितम् ।
विधीनां दशसाहस्रं विष्णोर्दिवस ईरितः ॥ ३३ ॥
पक्ष[3]मासादि वर्षादि ज्ञातव्यं परमेश्वरि ।
दशसाहस्रवर्षाणि विष्णोरायुः प्रकीर्त्तितम् ॥ ३४ ॥
तल्लक्षायुः शिवस्याथ तद्द्वैगुण्यमथैश्वरम् ।
सदाशिवस्य तल्लक्षं[4] गणना तु[5] परात्परे[6] ॥ ३५ ॥
तदुत्तरं[7] महेशानि स्वराट्[8]चक्रं भविष्यति ।
विराट्चक्रं तद्द्विगुणात्[9] सर्वराट् द्विगुणात्ततः[10] ॥ ३६ ॥
सर्वराडुत्तरं देवि ततः शून्यं भविष्यति ।
ततः शून्या परा रूपा श्रीमहासुन्दरी कला ॥ ३७ ॥
सुन्दरी राजराजेशी महाब्रह्माण्डनायिका ।
महाशून्या ततस्तारा तद्द्वैगुण्यक्रमेण च ॥ ३८ ॥
मुक्तौ[11] संयोज्य सर्वं तु महासुन्दर्य्यनन्ततः ।
एवं हि शतवर्षाणि महा[12]प्रलयकारिणी ॥ ३९ ॥
महाप्रलयनामा तु सकृदेव प्रवर्तते ।
महाप्रलयके जाते ततः शून्यं भविष्यति ॥ ४० ॥
ब्रह्मरूपा परानन्दा केवला तारिणी परा ।
सर्वं तस्यां तु संलीनं तद्रूपं[13] सर्वमेव तु ॥ ४१ ॥
एवं देवि महाशून्यं महादक्षिणकालिका ।
व्याप्य तिष्ठति देवेशि शून्यं कृष्णस्वरूपकम् ॥ ४२ ॥

[1] B D तथा प्रोक्ता । [2] C °तो । [3] B यथा । [4] B N °वे तन्नवकं ।
[5] B न, D N तत् । [6] D N °परा परे । [7] C एतदुक्तं । [8] N स्वा° । [9] B C °णं ।
[10] B णं ततः, C °णान्तकम् । [11] B °क्त्या । [12] C D ब्रह्म° । [13] D °द्रूयं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति संक्षेपतः प्रोक्तं रचनां[1] गोलके श्रृणु ।
आणव्यं[2] कार्मणं चैव मायाप्रकृतिमेव च ॥ ४३ ॥
अहङ्कारः पंचमः स्यात् सृष्टिस्थितिलयस्तथा ।
प्रधानानुग्रहो देवि व्यवस्थां श्रृणु यत्नतः ॥ ४४ ॥
आणव्यं जीवमात्रं स्याद्ब्रह्मविष्णोश्च कार्मणम् ।
मायामू[3]लस्तु रुद्रस्य[4] प्राकृतस्तु तथेश्वरे[5] ॥ ४५ ॥
सदाशिवस्याहङ्कारः परशम्भोर्न किञ्चन ।
सृष्टिस्थितिलयश्चैव तिरोधानं त्वनु[6]ग्रहः ॥ ४६ ॥
क्रमेण पंचकं जातं परशम्भोस्तु मायया ।
वर्णाध्वा चैव मात्राध्वा तत्त्वाध्वा तदनन्तरम् ॥ ४७ ॥
मन्त्राध्वा भुवनाध्वा च कलाध्वा ऋतुसंज्ञकः ।
अयमध्वा त्रिधा प्रोक्तस्त्वचिदे[7]हक्रमेण च ॥ ४८ ॥
आधि[8]भूतं चाधिदैवं देहचक्रं तथाण्डके ।
त्रिधा तु कथितं देवि रचनां श्रृणु यत्नतः ॥ ४९ ॥
पुरीषट्कमध्यगता लङ्काचीनक्रमेण च ।
लङ्कापुर्य्यभिधो देवि मध्यभागे प्रतिष्ठितः ॥ ५० ॥
परितः समभागत्वान्मेरुकार्य्ये नियोजिता ।
लङ्कातो दक्षभागे तु सप्त वै सागराः स्मृताः[9] ॥ ५१ ॥
तत्र द्वीपा महेशानि संख्या त्वष्टादशैव तु ।
समुद्राः सप्त देवेशि सागरास्ते प्रकीर्त्तिताः ॥ ५२ ॥
स्वादूदकास्ते देवेशि तत्र वै वडवानलः ।
तदन्ते नरकाः[10] प्रोक्ता मध्ये भोगवती पुरी ॥ ५३ ॥

[1] D वंचनं । [2] C °नन्त्यं, B °णवः । [3] C °म° । [4] C °द्रेभ्यः । [5] D महेश्वरि । [6] D °नमनो° । [7] D त्वां च दे° । [8] B °दि° । [9] B सागरास्ते प्रकीर्त्तिता । [10] C नरकाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

लङ्का तु भूमिमध्यस्था सर्वतो हि समा शिवे ।
गन्धमादनपार्श्वे तु[1] हिममेरुः प्रकीर्त्तितः ॥ ५४ ॥
तदुत्तरे स्वर्गभूमिस्तत्र लोकाः प्रतिष्ठिताः ।
उपर्य्यधस्ताल्लोकाश्च शतकक्ष्या[2] समन्विताः ॥ ५५ ॥
दक्षोत्तरे ध्रुवद्वन्द्वं ब्रह्माण्डं तत्र वै स्थितम् ।
अधस्तात् सप्तपातालं सप्तलोकास्तदूर्ध्वके ॥ ५६ ॥
एवं लोकत्रयं जातं तदण्डं परिवर्त्तते ।
ग्रहनक्षत्रसूर्य्यस्य सोमस्येन्द्रस्य दिग्ग्रहाः ॥ ५७ ॥
एतद्धामाः[3] समाख्याता मध्ये तु किन्नरादयः ।
ब्रह्मविष्णुशिवादीनां ततो लोकाः प्रकीर्त्तिताः ॥ ५८ ॥
ईश्वराख्यस्ततो देवि ततश्चैव सदाशिवः ।
ततो हि दण्डिनीनाथलोकश्च[4] परिकीर्त्तितः ॥ ५९ ॥
मंत्रिण्यंबा[5] गृहं तत्र सप्तप्राकारभूषितम् ।
परापरं ततः प्रोक्तं ततश्चैव परात्परम् ॥ ६० ॥
परातीता ततः प्रोक्ता चित्परा तदनन्तरम् ।
सप्तमं श्रीपुरं[6] देवि तदूर्ध्वं कोटियोजनम् ॥ ६१ ॥
चतुरस्रं कोटिलक्षं योजनं तारिणीपुरम् ।
नवप्राकारसंयुक्तं अनन्तायामविस्तृतम् ॥ ६२ ॥
कालचक्रं तत्र देवि कालनित्या[7] क्रमेण च ।
कालनित्यापुरे देवि श्रीचक्रं परिनिष्ठितम् ॥ ६३ ॥
तत्र बिन्दौ महेशानि निर्वाणाख्यं पुरं भवेत् ।
तद्बिन्दौ परमेशानि शाम्भवाख्यं पुरं भवेत् ॥ ६४ ॥
तद्बिन्दौ राजसं देवि शान्त्यतीतं कलायुतम् ।
चतुष्कश[8] वसंयुक्तपर्यङ्केन सदाशिवम्[9] ॥ ६५ ॥

[1] N °न । [2] D स्वस्वरक्षा° । [3] C °न्नामा, D °द्रामा । [4] D °स्य । [5] MSS मुद्रिण्यं वा । [6] D °री । [7] D °विद्या° । [8] B C N °शि° । [9] B C N °वः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तत्र कामकलातीतं महाकामेश्वरं परम् ।
तत्पर्य्यङ्के महेशानि शान्त्यतीतां कलां पराम् ॥ ६६ ॥
नवात्मकेश्वरीमम्बां कोटिब्रह्माण्डनायिकाम् ।
सर्वाढ्य[1]मेतद्ब्रह्माण्डं कीर्त्तितं परमेश्वरि ॥ ६७ ॥
कलाप्राकारसंयुक्तं श्मशानं तत्र पार्वति ।
प्रत्यालीढपदाख्यं च तत्र श्रीतारिणीपुरम् ॥ ६८ ॥
चतुष्षष्टिशूलं[2] शुक्ल[3]मनन्ता[4]यामविस्तृतम् ।
श्रीदक्षिणाश्मशानं च श्मशानाष्टकमेव तत्[5] ॥ ६९ ॥
परितो देवदेवेशि शतद्वारसमन्वितम् ।
कोटिब्रह्माण्डप्रेतैस्तु भूषितं भैरवीयुतम् ॥ ७० ॥
त्रिंशन्निखर्वषट्पद्माः[6] शरभैः संयुतं शिवे ।
महाज्वालानलैर्दीप्तं मुण्ड[7]बिन्दुविभूषितम् ॥ ७१ ॥
सप्त[8]प्रेतगता काली दक्षिणा तत्र तिष्ठति ।
तदाज्ञया धनुर्वेदाः सुन्दरीद्वारि संस्थिताः ॥ ७२ ॥
सुन्दरीद्वारि देवेशि चतुर्वेदाः षडङ्गकाः[9] ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ ७३ ॥
शिक्षा कल्पो व्याकरणं छन्दो ज्योतिर्निरुक्तकम् ।
षडङ्गमिति संप्रोक्तं तथा षट्दर्शनानि च ॥ ७४ ॥
षडाम्नाया महेशानि तथा षट्शाम्भवं[10]शिवे ।
कादिहादिक्रमेणैव द्विविधं परिकीर्त्तितम् ॥ ७५ ॥
कादावष्टादशविधं हादावष्टादश प्रिये ।
उपवेदचतुष्कं च तदाख्यं श्रृणु पार्वति ॥ ७६ ॥
ऋग्वेदस्य धनुर्वेदः शाखाभिः परिभूषितः ।

[1] C °घ°, D °न्त्य°। [2] D °शून्य। [3] C °क्लं। [4] D मण्डला°।
[5] B D N तत् पुनः। [6] B °द्म°। [7] D शत°। [8] D °र्वे°।
[9] B D N स्वच्छन्दकाः, C सचन्दकाः। [10] B °वी°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आयुर्वेदो यजुर्वेदाच्छाखाशतकसङ्कुलः ॥ ७७ ॥
सामवेदस्य गा[1]न्धर्ववेदः प्रोक्तो महेश्वरि ।
शाखाभिर्भूषितो देवि काल[2]प्रियकरः परः ॥ ७८ ॥
अथर्वणस्य निगम[3]स्तच्छाखाभि[4]र्विभूषितः ।
पंचाशद्वै महाभागे निग[5]मः परिकीर्त्तितः ॥ ७९ ॥
समग्र[6]कालिकाद्वारि त्रिलोके त्रि[7]क्रमेण च ।
चतुष्पदं ब्राह्मणानां त्रिपदं क्षत्रजन्मिनाम् ॥ ८० ॥
अथर्वणे नाधिकारः क्षत्रियाणां कदाचन ।
तत्कर्म्माचरणं देवि ब्राह्मणद्वारतश्चरेत् ॥ ८१ ॥
संस्कार-एव तुर्य्यस्य[8] क्षत्रियाणां द्विजेश्वर[9]: ।
चतुष्पदा[10] ब्राह्मणाः स्युस्त्रिपदाः[11] क्षत्रियाः स्मृताः ॥ ८२ ॥
चतुर्दशमहाभारः[12] स्वर्गे श्रीसुन्दरीगृहे ।
दिक्महाभार[13]संख्या च पाताले पद्मिनीगृहे ॥ ८३ ॥
तत्त्वसंख्यमहाभारो[14] मर्त्य[15]लोके प्रतिष्ठितः ।
सिद्धानां नवनाथानां देवा[16]नामोघसन्निधौ ॥ ८४ ॥
सरस्वतीगृहे देवि क्रमात्ति[17]ष्ठति पार्वति ।
शाक्तं शैवं गाणपतं सौरं वैष्णवमेव च ॥ ८५ ॥
बौद्धं तु देवदेवेशि ताराषड्दर्शनानि च ।
वैदिकं चैव सौरं च गाणपत्यन्तमेव[18] च ॥ ८६ ॥
बौद्धं तु देवदेवेशि त्रिपुरादर्शनानि च ।

[1] D ग°। [2] B °ली। [3] D N गुच्छाभिः। [4] D N शाखाभिश्च। [5] C °य°। [6] D सामगः। [7] D °ति°, C °वि°। [8] D कर्त्तव्यं। [9] D °राः। [10] B °वेंदा। [11] B °वेदा। [12] B D °वः। [13] B D °व°। [14] B D °वो। [15] B मस्त्य°, C N B मृत्यु°। [16] B D वेदा°। [17] D °भस्ति°। [18] B च एव।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चान्द्रं स्वा[1]यंभुवं जैनं चीनं नीलं महेश्वरि ॥ ८७ ॥
छिन्नाषट्दर्शनान्यवे कीर्त्तितानि त्रिधा शिवे ।
दर्शनत्रितयं देवि कालीविद्याप्रगोचरम् ॥ ८८ ॥
अष्टादशपुराणानि तथैवोपपुराणकम्[2] ।
[3]वेदस्य गदितं देवि उपवेदस्य पार्वति ॥ ८९ ॥
अष्टादशपुराणानि तथैवोपशमानि च ।
एकवीरा च त्वरिता[4] कालिका सुन्दरी तथा ॥ ९० ॥
छिन्ना मातङ्गिनी चैव गणेशार्काः प्रकीर्त्तिताः[5] ।
बगला मालिनी तारा त्रिजटाऽक्षोभ्यकालके ॥ ९१ ॥
बटुकः सुन्दरः शम्भुः शाम्भवस्तु नवात्मकः ।
अष्टादशपुराणानि उपसंख्यानि पार्वति ॥ ९२ ॥
श्रुतिर्वेदश्च देवेशि उपवेदश्च वै स्मृतिः ।
चतुःषष्टिकला देवि चतुःषष्टिर्हि सिद्धयः ॥ ९३ ॥
तथोपनिषदोऽन्यत्र द्विपंचाशन्महेश्वरि ।
उपदि[6]ष्टानि देवेशि चतुःषष्टि भवन्ति च ॥ ९४ ॥
सू[7]क्तानि त्रि[8]सहस्राणि ताण्डवानां शतं शिवे ।
त्रिशतं कौशलाः प्रोक्ताः कौमुदी तु कलाभिधा ॥ ९५ ॥
दीपिकानां चतुःषष्टिः प्रकाशानां च सप्ततिः ।
सांख्यायनानां पंचाशत् सूरा[9]णां पंचकं शिवे ॥ ९६ ॥
वार्त्तिकानां द्वयं देवि तन्त्रराजद्वयं शिवे ।
नित्याषोडशतन्त्राख्यं खण्डाष्टकसमन्वितम् ॥ ९७ ॥
हादिकादिमतत्वेन हादिकादिक्रमेण च ।

[1] B स्व°। [2] C ° समानि च। [3] C omits two lines. [4] D एकाकारं च चरिता। [5] D ° कालिके ततः। [6] B परिशि°। [7] D यु°। [8] D द्वि°। [9] N पूर्ण°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूर्वार्धं चोत्तरार्धं च मिलित्वा तु विराड्मतम् ॥ ९८ ॥
शक्तिसंगमनामानं[1] तन्त्रराजं कहात्मकम् ।
चतुःखण्डसमायुक्तं तन्त्रराजोत्तमोत्तमम् ॥ ९९ ॥
पंचाशदध्यायै[2]र्युक्तं षट्कपंचकसंयुतम् ।
एवं क्रमेण देवेशि तन्त्राण्याम्नायके शिवे ॥ १०० ॥
आधारभूतं देवेशि सूक्ष्म[3]ब्रह्माण्डमत्र[4] तु ।
अनेकानि च देवेशि ब्रह्माण्डानि च मध्यतः[5] ॥ १०१ ॥
तस्योपारि महेशानि ब्रह्माण्डक[6]लिकाकृतिम् ।
जम्बुद्वीपे यदाभासस्तदा द्वीपेश्वरो भवेत् ॥ १०२ ॥
विश्वरूपक्रमेणैव देहमात्रप्रगोचरम् ।
दिवारात्रिर्महेशानि नराणां षष्टिनाडिभिः ॥ १०३ ॥
पितृणां तु महेशानि मासद्वितयमेव च ।
ऋतुमात्रे दिवारात्रिः सिद्धानां परिकीर्त्तिता ॥ १०४ ॥
देवानां तु महेशानि हायन[7]द्वितयं भवेत् ।
दक्षिणाख्यो भवेद्रात्रिस्तदन्यो[8] दिवसो भवेत् ॥ १०५ ॥
कालिकाया महेशानि षष्टिशून्ये तु नाडिका ।
नाडिषष्टिभिरेवात्र दिवसः परिकीर्त्तितः ॥ १०६ ॥
एवं क्रमेण देवेशि सर्वदा शून्यमध्यगा ।
अविनाशी सदा स्थाता कोटिब्रह्माण्डचर्वणा ॥ १०७ ॥
राजदन्तद्वये देवि ब्रह्माण्डानामनन्तकम् ।
स्थूलसूक्ष्मप्रभेदेन द्विविधं परिकीर्त्तितम् ॥ १०८ ॥
कालनित्या महेशानि सर्वदा व्याप्य तिष्ठति ।

[1] DN ख्यं । [2] BCN ° हृदयै ° । [3] C लक्षा °; D शिक्षा ° । [4] D ° मेव । [5] B ° मः । [6] B का ° । [7] C ° नं । [8] C ° दान्या ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विंशत्सा[1]हस्त्रकं सप्तशती षट्त्रिंशदीरिता[2] ॥ १०९ ॥
कालनित्या महेशानि परमाण्वादिरूपिणी ।
पल[3]मध्ये घटीमध्ये कालनित्या प्रकीर्त्तिता ॥ ११० ॥
सपादघटिकारूपा सप्त वै वासराः स्मृताः ।
मुहूर्त्तरूपो देवेशि पक्षश्चात्र प्रकीर्त्तितः ॥ १११ ॥
तद्द्वयेन भवेन्मासस्तद्द्वयं ऋतुरेव च ।
तत्त्रयं त्वयनं देवि तद्द्वयं हायनं भवेत् ॥ ११२ ॥
प्रत्येकं व्याप्य देवेशि कालनित्या प्रकीर्त्तिता ।
परमाणुं समा[4]रभ्य हायनान्तं महेश्वरि ॥ ११३ ॥
कालनित्या च संव्याप्य ।तिष्ठति परमेश्वरि ।
मुहूर्त्ताख्यपदे देवि नाडीद्वयमुदीरितम् ॥ ११४ ॥
मुख्यमानेन देवेशि सार्द्धनाडीद्वयं भवेत् ।
दिनसप्तकमध्ये तु देवेशि वासराः स्मृताः ॥ ११५ ॥
दिनपंचदशान्तं च तथा मासान्त[5]कं शिवे ।
ऋत्वन्तमयनान्तं च हायनान्तं महेश्वरि ॥ ११६ ॥
स्थूलमानमिदं प्रोक्तं श्रृणु पारायणक्रमम् ।
दिनतो वारतः पक्षात् मासात् षट्त्रिंशता दिनैः ॥ ११७ ॥
स्थूलसूक्ष्मप्रभेदेन राशिलग्नादिकं भवेत् ।
तथा ग्रहादिकं देवि सर्वमेतत् प्रवर्त्तते ॥ ११८ ॥
यः सं[6]क्रमो विद्यमानः[7] स राशिः प्रातरेव[8]तु ।
सूक्ष्मा राशिरियं प्रोक्ता प्रेतानां त्व[9]नुराशिका ॥ ११९ ॥
पलमात्रं भवेल्लग्नं स्थूले तु षष्टिनाडिभिः ।

[1] D स°। [2] D °द्देवताः। [3] C जल°। [4] N °मानन्दमा°। [5] C °त्म°। [6] C पंच°। [7] C °शमानं। [8] D प्रभवैव। [9] B प्रोतख्यातं, D प्रेतार्द्धानां, C प्रेताख्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पललग्नं घटीलग्नं मुहूर्तं प्रहरे शिवे ॥ १२० ॥
त्रिंशन्नाडीक्रमेणैव दिवारात्रिक्रमेण च ।
लग्नमेतत्त्रिधा प्रोक्तं राशिसंक्रम[1]मूलतः ॥ १२१ ॥
लग्नं तात्कालिकं प्रोक्तं चतुर्धाऽऽत्र ग्रहाः शिवे ।
मुनिनन्दरवीन्द्रैश्च स्थूलसूक्ष्मप्रभेदतः ॥ १२२ ॥
सूर्य्योदये तु यो वारस्तद्वारश्च ग्रहात्ततः ।
पलनाडीक्रमेणैव ग्रहाणां परिवर्तनम्[2] ॥ १२३ ॥
सूर्योदये तु यो वारस्तद्वारो वासरः स्मृतः
अहोरात्रं घटी देवि पलयाममुहूर्तकैः ॥ १२४ ॥
ब्रह्मादिदेवजातीनां यो भोगो वर्षमात्रतः ।
मनुष्याणां स भोगो हि वारस्तत्र भवेत् शिवे ॥ १२५ ॥
सूक्ष्ममानेन देवेशि स भोगः परिवर्त्तते ।
सूक्ष्मज्ञानं समासाद्य स्थूलज्ञानं ततश्चरेत् ॥ १२६ ॥
तत्कालोदयवर्णस्य कालनित्याविधौ शिवे ।
संयोगश्च प्रकर्त्तव्यः सा प्रोक्ता तूदयाक्षरी ॥ १२७ ॥
उदयाक्षरसंयोगः कालनित्याविधौ शिवे ।
गुणनेन चरेद्देवि सा तु कालेश्वरी भवेत् ॥ १२८ ॥
दिगक्षरस्य संयोगः कालनित्याविधौ यदा[3] ।
तदा दिगीश्वरी प्रोक्ता त्वरितं फलदायिनी ॥ १२९ ॥
पृच्छ[4]काद्वर्ण[5]संयोगात् कालनित्याविधौ यदा ।
तदा जीवेश्वरी प्रोक्ता सर्वजीवप्रसाक्षिणी ॥ १३० ॥
तथा मासक्रमेणैव मासः पंचविधो भवेत् ।
चान्द्रसावननाक्षत्रसौरबार्हस्पतक्रमात् ॥ १३१ ॥
पौर्णिमात् पौर्णिमान्तो हि चान्द्रमासः प्रकीर्त्तितः ।

[1] D °लग्न°, C °मन्त्र° । [2] D ° कीर्त्तितम् । [3] B शिवे । [4] C °च्छु° ।
[5] N स्पर्श ° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चन्द्रदर्शात् चंद्रदर्शं द्विधा [1]चान्द्रः प्रकीर्त्तितः ॥ १३२ ॥
अमामारभ्य देवेशि पुनः सा वै यदा भवेत् ।
सावनाख्यो महेशानि मासोऽयं च प्रकीर्त्तितः ॥ १३३ ॥
ऋक्षाद[2]क्षं समारभ्य नाक्षत्रः कीर्त्तितः शिवे ।
संक्रमान्तं[3] च देवेशि सौर इत्यभिधीयते ॥ १३४ ॥
बार्हस्पत्यभिधो मासः षट्त्रिंशद्दिवसात्मकः ।
नित्या षोडशभिर्देवि मासः षोडशकं भवेत् ॥ १३५ ॥
अष्टादशदिनैर्देवि पक्षश्चात्र प्रकीर्त्तितः ।
तद्द्वयैर्मास इत्युक्तस्तत्क्रमं शृणु पार्वति ॥ १३६ ॥
पूजाक्रमे महेशानि नित्याषोडशमण्डलम् ।
नित्याषोडशकं देवि शान्तिः सप्तदशी शिवे । १३७ ॥
शान्त्यतीता तदन्ते स्यादेवमष्टादश प्रिये ।
न ऱ्हासो न च वृद्धिश्च नित्यादिवसमण्डले ॥ १३८ ॥
उदयार्णक्रमेणैव सम्पूर्णो दिवसो भवेत् ।
तुर्य्यमासो महेशानि पंचाशद्दिवसात्मकः ॥ १३९ ॥
वर्णमासाभिधः प्रोक्तः प्रत्यहं वर्णमात्रकः ।
चत्वारिंशत्तथाष्टौ च ऊनपंचाशदेव वा ॥ १४० ॥
पंचाशन्मातृकावर्णान्मण्डलं त्रिविधं स्मृतम् ।
पूर्वं बटुकसंमत्या द्वितीये कालसम्मतिः ॥ १४१ ॥
द्वितीये त्रिविधत्वं च कीर्त्तितं परमेश्वरि ।
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥ १४२ ॥

इति श्रीशक्तिसङ्गममहातन्त्रराजे उत्तरभागे प्रथमखण्डे श्रीमदक्षोभ्यतारासंवादे कालनित्याविधिर्नाम द्वितीयः पटलः ॥ २ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

[1] B N च°। [2] All MSS °द°। [3] C ° मणं।

CC-0.In Public Domain. Digitization by eGangotri

तृतीयः पटलः ।

श्रीदेव्युवाच ।

देवेश श्रोतुमिच्छामि भूतादियुगनिर्णयम् ।

श्रीशिव उवाच ।

रहस्यातिरहस्यं च संक्षेपात् कथ्यते शृणु ॥ १ ॥
ब्रह्मणोत्पत्तिमारभ्य वर्त्तमानदिनावधिः ।
अहर्गणस्य विज्ञानं सिद्धान्तः परिकीर्त्तितः ॥ २ ॥
कलेरारम्भदिवसात्[1] वर्त्तमानदिनावधिः ।
अहर्गणस्य विज्ञानं तन्त्रमित्यभिधीयते ॥ ३ ॥
युगादिदिनमारभ्य शकाहान्तं महेश्वरि ।
अहर्गणस्य विज्ञानं करणं[2] कीर्त्तितं मया ॥ ४ ॥
कृतादीनां युगानां तु[3] दिनेष्वेकैकशः क्रमात् ।
दिननित्या भवे[4]त्तत्र[5] स दिनं प्रतिवासरम् ॥ ५ ॥
आदौ कलावतीते तु वर्षेष्वेकादशस्वथ ।
वर्षे द्वादशमे मासे चैत्राख्ये नवमीतिथौ ॥ ६ ॥
वारे रवेर[6]तीते च नाथे विश्वेश[7]सम्भवे ।
तदारभ्योदयक्षान्ता[8] वर्णाः[9] षट्त्रिंशदात्मकाः[10] ॥ ७ ॥
युगवासरभेदेन वर्त्तन्ते परमेश्वरि ।
स्वराः षोडशभिस्तान्तु गणयेदक्षरं प्रति ॥ ८ ॥

[1] D °र्वादिवसाद्देवि। [2] D देवेशि। [3] B ° दीनां। [4] D दिनाद्यभावे। [5] C D N त्तस्मा।
[6] D तिथाव °। [7] D मित्रे च। [8] D ° न्तो। [9] D ° र्णे। [10] D ° कः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एकैकस्वरयुक्तेन वर्णेनावान्त[1]रो युगः ।
अवान्तर[2]युगा ज्ञेया दिवसा वर्णसंख्यया ॥ ९ ॥
क्रमात् षट्त्रिंशद्वर्णाः स्युः प्रत्येकं प्रतिवासरम् ।
युगैः षोडशभिस्त्वेवमेको वर्णो युगो मतः ॥ १० ॥
षट्सप्तत्युत्तरैः पंचशतसंख्यैश्च वासरैः ।
एतैर्वर्णयुगैः प्रोक्तः षट्त्रिंशद्भिर्महायुगः ॥ ११ ॥
सहस्राणां च विंशत्या[3] षट्त्रिंशदधिकैः शतैः ।
सप्तभिश्च दिनानां तु संख्या प्रोक्ता महायुगे ॥ १२ ॥
'आई' पल्लवितेत्यत्र सिद्धा वर्णात्र सूचिताः ।
वत्सराः सप्तपंचाशत् मासाः सप्त दिनानि षट्[4] ॥ १३ ॥
कालेनैव वत्सराणां एकपर्याय ईष्यते ।
पर्य्यायश्च कलौ सप्त सहस्राणि ततः परम् ॥ १४ ॥
एकादशोत्तरत्वं च[5] षट्शतानि भवन्ति हि ।
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥ १५ ॥

श्रीदेव्युवाच ।

देवेश श्रोतुमिच्छामि पीठानां तु विनिर्णयम् ।
यस्य विज्ञानमात्रेण साधकः सिद्धिमाप्नुयात् ॥ १६ ॥

श्रीशिव उवाच ।

पीठं तु पंचधा प्रोक्तं पंचायतनमार्गतः ।
सप्तसोपानसंयुक्तं मेरुकैलासमार्गतः ॥ १७ ॥
सिंहाक्रान्तं च देव्यां वै शैवे वृषभरूपकम् ।
वैष्णवे गरुडाक्रांन्तं गजाक्रान्तं च गाणपे ॥ १८ ॥

[1] N °रः । [2] D अन्तराल, C अन्तरेश्च । [3] N त्रिं° । [4] D द्विषद् द्विषद् । [5] C N °रं तां ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

हंसा[1]क्रान्तं सौरमन्त्रे[2] काल्यां[3] प्रेतसमन्वितम् ।
नवसोपानसंयुक्तं सुन्दर्य्याः पीठमीरितम् ॥ १९ ॥
सोपानेन समायुक्तमङ्गुलोत्सेधमेव च ।
इति पीठं मया प्रोक्तं ऋतुशाम्भवकं शृणु ॥ २० ॥
चैत्रादिमासमारभ्य फाल्गुनान्तं महेश्वरि ।
वसन्तादि समारभ्य हेमन्तान्तं महेश्वरि ॥ २१ ॥
ऋतुषट्कं मया प्रोक्तं अत्रैवं शाम्भवक्रमः ।
कृष्णशुक्लपक्षयोगात् द्विमासे षष्टिवासराः ॥ २२ ॥
षष्टिषट्कप्रयोगेन त्रिशतं षष्टिरश्मयः ।
मधुकृष्णा वसन्ताख्या प्रतिपत् परिकीर्त्तिता ॥ २३ ॥
मधुकृष्णा वसन्ताख्या द्वितीया परिकीर्त्तिता ।
एवं क्रमेण देवेशि शुक्लपक्षेऽपि योजयेत् ॥ २४ ॥
माधवकृष्णप्रतिपद् द्वितीया च ततः शिवे ।
एवं शुक्लक्रमेणैव सर्वत्र विनियोजनम् ॥ २५ ॥
अथवाऽन्यक्रमेणैव शाम्भवं शृणु साम्प्रतम् ।
षट्पंचाशन्महापुर्य्यः पार्थिवे परिकीर्त्तिताः ॥ २६ ॥
जलग्रामा[4] महेशानि द्विपंचाशत् प्रकीर्त्तिताः ।
आग्नेय[5]रश्मयो देवि द्विषष्टिरिति कीर्त्तिताः ॥ २७ ॥
वायव्यग्रामा देवेशि चतुःपंचाशदीरिताः ।
अथ नाभसग्रामाणां संख्या द्विसप्ततिर्भवेत् ॥ २८ ॥
अथ मानसग्रामाणां संख्यां शृणु महेश्वरि ।
चतुःषष्टिरिति प्रोक्ता क्रमात् षट्शाम्भवे भवेत्[6] ॥ २९ ॥
श्रीपुरादिमहापुर्य्यः पार्थिवाख्ये प्रकीर्त्तिताः ।
षट्शाम्भवादिग्रामाणां संख्यामग्रे प्रकथ्यते ॥ ३० ॥

[1] D ह्या°। [2] D °मात्रे। [3] C कन्यां। [4] D °ह्या। [5] N °ये। [6] C °वे शिवे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रत्येकं चैव नामानि कथ्यन्ते सिद्धिकेर[1]ले ।
पूर्वं संसूचितं ते यत्तदद्य कथ्यते शृणु ॥ ३१ ॥
गोपनीयं महेशानि स्वयोनिरपरा यथा ।
श्रीकाल्युपासका ये च तत् कुलं परिकीर्त्तितम् ॥ ३२ ॥
तेषां समूहो देवेशि कुलं[2] संकीर्त्तितं मया ।
कालीविद्योपासकैस्तु[3] कुलपूजाविधौ शिवे ॥ ३३ ॥
गन्तव्यं यत्नतो देवि नान्यत्र प्रव्रजे[4]त्क्वचित् ।
अन्यत्र यदि वै गच्छेत्तदुच्छिष्टं भवेच्छिवे[5] ॥ ३४ ॥
यस्य या देवता प्रोक्ता सा तस्येष्टा प्रकीर्त्तिता ।
माध्वीकं पात्रमध्यस्थं तर्पणोच्छिष्टमेव तु[6] ॥ ३५ ॥
उच्छिष्टतर्पणादेव देवताशापमाप्नुयात् ।
अत एव महेशानि बन्धनानि प्रजायते ॥ ३६ ॥
एवं सर्वं तु विज्ञाय सङ्गं त्यक्त्वा सुखी भवेत् ।
एतच्चक्रे महेशानि गच्छेच्चै[7]व कुलाकुलम्[8] ॥ ३७ ॥
रहस्यं तु महेशानि पूजान्ते शृणुं सादरम् ।
घटस्थशुद्धिसहितं तृतीयादि सपंचमम् ॥ ३८ ॥
देव्यै निवेद्यते देवि तदन्ते वीरभोजनम् ।
तद्वीरभोजने देवि स्वदेवतर्पणं भवेत् ॥ ३९ ॥
उच्छिष्टेन महेशानि कथं तु[9] तर्पणं भवेत् ।
एतदज्ञानतो देवि देवताशापमाप्नुयात् ॥ ४० ॥
जाते तु देवताशापे बन्धनं जायते ध्रुवम् ।
कुलाकुलमिदं प्रोक्तमकुलं शृणु पार्वति ॥ ४१ ॥

[1] N °व°। [2] C °ले। [3] B स्तत्। [4] N भवे°। [5] C N °त्प्रिये।
[6] D °कं भवेत्। [7] N °न्नै°। [8] C D °ला। [9] B D तत्°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सुन्दरी भैरवी धूम्रा त्वकुलत्वेन[1] कीर्त्तिता ।
अकुलास्तु महेशानि तत्पूजायां व्रजेत् सदा ॥ ४२ ॥
तैर्नान्यत्र प्रगन्तव्यं इति संक्षेपतो मतम् ।
प्रमादात् यदि गच्छेद्वै तेषां शापो भवेद् ध्रुवम् ॥ ४३ ॥
पूर्णाभिषेकराहित्यं वीरपक्षे[2] मतं शिवे ।
पूर्णचक्रे महेशानि पूर्णचक्री भवे[3]द् ध्रुवम् ॥ ४४ ॥
ऊर्ध्वाम्नाये महेशानि ऊर्ध्वाम्नायी व्रजेत् सदा ।
निर्वाणदीक्षितो देवि निर्वाणपूजने व्रजेत् ॥ ४५ ॥
षट्शाम्भवक्रमे देवि शाम्भवार्चाविधौ व्रजेत् ।
मेधादीक्षाविधौ देवि नेदं[4] मानं मयेरितम् ॥ ४६ ॥
सिद्धरूपे महेशानि स्वे[5]च्छया कर्म्म वा चरेत्[6] ।
गौडदक्षिणकाश्मीरसम्प्रदायक्रमाद्भवेत् ॥ ४७ ॥
गौडे सर्वत्र गमनं[7] कीर्त्तितं तु मया तव ।
षडाम्नाये महेशानि काश्मीरे गमनं भवेत् ॥ ४८ ॥
कुलाकुलविभेदेन केरले गमनं भवेत् ।
पूर्णाभिषेकयुक्तानां सर्वत्र गमनं शुभम्[8] ॥ ४९ ॥
पूर्णाभिषेकी देवेशि यस्मिन् देशे विराजते ।
स देशो धन्यतां याति समन्ताल्लक्षयोजनम् ॥ ५० ॥
पूर्णाभिषेकयुक्तानां शक्तिपातः प्रजायते ।
अयोग्यस्यापि कालेन कालीविद्यारतस्य च ॥ ५१ ॥
चतुःषष्टिविधौ देवि शक्तिपातो भवेत् ध्रुवम् ।
नील[9]सारस्वते तन्त्रे पंचधा परिकीर्त्तितः ॥ ५२ ॥
श्रीसुन्दर्य्यां महेशानि शक्तिपातोऽष्टधा भवेत् ।

[1] D कुलाकुलं । [2] C N °क्ष° । [3] N व्रजे° । [4] C N °द° । [5] °C चे° । [6] C °मारभेत् । [7] B D गन्तव्यं । [8] C भवेत् । [9] B काली ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

छिन्ना[1] विद्याविधौ देवि शक्तिपातश्चतुर्विधः ॥ ५३ ॥
बगलाया[2]सु विद्यासु शक्तिपातो द्विधा भवेत् ।
वैष्णवाद्यागमे देवि शक्तिपातस्तु पंचधा ॥ ५४ ॥
इति संक्षेपतः प्रोक्तं रहस्यं सादरं शृणु ।
शक्तिं विना महेशानि पूजनं यः समाचरेत् ॥ ५५ ॥
स दरिद्रो[3] मम[4] द्रोही तस्य नाशो भविष्यति ।
शक्तिशिवात्म्यमासाद्य पूजनं समुपाचरेत् ॥ ५६ ॥
एवं यः कुरुते मर्त्यः स शिवो नात्र संशयः ।
शक्तेस्तु पूजनं कार्य्यं दिव्यभावफलाप्तये ॥ ५७ ॥
इति संक्षेपतः प्रोक्तं पात्रभेदं शृणु प्रिये ।
रसवेद[5]मितैः पात्रैः संख्या सर्वोत्तमा भवेत् ॥ ५८ ॥
कलासंख्यामितैः पात्रैः संख्या प्रोक्ता तु मध्यमा ।
नाथसंख्यामितैः पात्रैः संख्या प्रोक्ता कनिष्ठिका ॥ ५९ ॥
बाणसंख्यामितैः पात्रैः संख्या सामान्यकर्मणि ।
केरलश्चैव काश्मीरो गौडश्चैव तृतीयकः ॥ ६० ॥
केरलाख्यमते देवि वारि[6]पात्रं तु दक्षिणे ।
काश्मीरे तर्पणे भेदो गौडे वामकरे भवेत् ॥ ६१ ॥
देवीप्रणवनामा च निर्गुणप्रणवस्तथा ।
बगला कमला वाणी पराद्याश्च शतोत्तराः[7] ॥ ६२ ॥
अथातः संप्रवक्ष्यामि निर्णयं प्रणवस्य च ।
कलापञ्चकसंयुक्तस्तत्क्रमं शृणु पार्वति ॥ ६३ ॥
अकारश्च उकारश्च मकारश्च तृतीयकः ।
नादश्चतुर्थो गदितः पंचमो बिन्दुरीरितः ॥ ६४ ॥

[1] D °न्न°। [2] D कालविद्या°। [3] N °द्री। [4] D भवे°।
[5] N °भेद°। [6] BD बाले। [7] D [illegible]।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
एते पञ्च महाप्रेताः प्रणवं च समाश्रि[1]ताः ॥ ६५ ॥
शृणु यत्नेन देवेशि कलासप्तकरूपिणम् ।
कलासप्तस्वरूपं च पञ्च[2]धा भेद ईरितः[3] ॥ ६६ ॥
अकारश्च उकारश्च मकारश्च तृतीयकः ।
नादबिन्दुस्ततो देवि नादातीतस्ततो भवेत् ॥ ६७ ॥
बिन्द्वतीता सप्तमी स्याच्छाम्भवी परिकीर्त्तिता ।
शक्तीः[4] शृणु महेशानि किमितोऽपि रहस्यकम् ॥ ६८ ॥
अकारश्च उकारश्च मकारश्च तृतीयकः ।
नादश्च तदतीतश्च[5] बिन्दुश्चैव ततः परम् ॥ ६९ ॥
बिन्द्वतीता सप्तमी स्यादेवं शक्तिकला[6] शिवे ।
शाक्तशक्ति[7]क्रमेणैव कलासप्तकमीरितम् ॥ ७० ॥
आदौ परा विनिर्दिष्टा ततश्चैव परात्परा ।
तदतीता तृतीया स्यात् चित्परा च चतुर्थिका ॥ ७१ ॥
तत्परा पञ्चमी ज्ञेया तदतीता रसाभिधा ।
सर्वातीता सप्तमी स्यादेवं सप्तविधाः कलाः ॥ ७२ ॥
पञ्च क्रमेण देवेशि शृणु सप्तकलासतीम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ७३ ॥
शान्तिश्च तदतीता च कलासप्तकमीरितम् ।
चतुष्टयं तु कशिपुः मृतकश्च सदाशिवः ॥ ७४ ॥
[8]ब्रह्मादयश्चतुष्पादाः कशिपुस्तु[9] सदाशिवः ।
आच्छादनं तु कामेशस्तत्रस्था सुन्दरी कला ॥ ७५ ॥

[1] B °मन्वि°। [2] D N सप्त°। [3] D °मीरितम्। [4] C °क्तिं।
[5] C D N °ता च। [6] D N °क्तीः कलाः। [7] B D N शक्तशाक्ती°।
[8] This line is omitted in C N। [9] MSS °कलङ्कं तु।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रणवः सुन्दरीरूपः कलासप्तक[1]संयुतः ।
पञ्चप्रणवयोगे तु कलासप्तकपञ्चके[2] ॥ ७६ ॥
सप्ततारेति विख्याता कथिता पूर्वमेव तत् ।
हंसरूपा कामकला तत्स्वरूपं निगद्यते ॥ ७७ ॥
हकारेण बहिर्याति सकारेण विशेत् पुनः ।
हकारस्य सकारस्य लोपे कामकला भवेत् ॥ ७८ ॥
पक्षद्वयेन रहितो हंसः कामकला भवेत् ।
सोऽहमेतस्य देवेशि रूपं कामकलाभिधम् ॥ ७९ ॥
सोऽहमित्यत्र देवेशि प्रणवः परिनिष्ठि[3]तः ।
जीवः[4] पक्षद्वयत्यागात् प्रणवः परिकीर्त्तितः ॥ ८० ॥
पराप्रासादविद्यायां एवमेव प्रकीर्त्तितम् ।
पक्षद्वयं सकारे च गगनेऽपि द्वयं भवेत् ॥ ८१ ॥
र[5]कारद्वययोगे तु सकारोत्पत्तिरीरिता ।
ई[6]कारैकारयोगे तु हकारः कीर्तितो मया ॥ ८२ ॥
अत एव महेशानि चतुःपक्षस्वरूपिणी ।
चतुश्चरणरूपा च परा[7]प्रासाददेवता ॥ ८३ ॥
आद्ये आद्यं परित्यज्य चरमे तु तदन्तकम् ।
पक्षद्वयेन संत्यक्तः[8] प्रणवः परिकीर्त्तितः ॥ ८४ ॥
र[9]कारः प्रथमः पक्षस्त्वेकारस्तु द्वितीयकः ।
मायाबीजादिके देवि रतिबीजादिकेऽपि च ॥ ८५ ॥
प्रणवस्य समुत्पत्तिर्वर्तते प्रियवादिनि ।
अर्द्धनारीश्वरो देवि हकारः परिकीर्त्तितः ॥ ८६ ॥
शक्तिबीजं तथा प्रोक्तं शृणु कामकलां शिवे ।

[1] N °क्ष °। [2] B ° स्वरूपकः । [3] D ° श्रि °। [4] B D N ° वे । [5] D य °। [6] D ओं °, B इ °। [7] N ° र °। [8] B ° सक्तं, D ° युक्तः । [9] D व °।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ईकारार्द्धमतं बिन्दु[1]मुखं भानुरधोगतम्[2] ॥ ८७ ॥
स्तनौ[3] दहनशीतांशुर्योनिर्हार्द्ध[4] कला भवेत् ।
हकारार्द्धपदे देवि ईकारैकारमीरितम् ॥ ८८ ॥
मुखं बिन्दुर्महेशानि तदधस्तु कुचद्वयम् ।
हकारार्द्धकलारूपं योनिचक्रं विदुः प्रिये ॥ ८९ ॥
अधोबिन्दुर्महेशानि परारूपः प्रकीर्त्तितः ।
योनिबिन्दुर्महेशानि तत्परारूपवान् भवेत् ॥ ९० ॥
कुच[5]बिन्दुर्महेशानि तदतीता प्रकीर्त्तिता ।
चित्परा तु द्वितीयस्तु तदतीता मुखे भवेत् ॥ ९१ ॥
सर्वातीता चण्ड[6]रूपा बीजादूर्ध्वं व्यवस्थिता ।
वाच्यातीतां कलां विद्धि ई[7]कारोर्ध्वकलां शिवे ॥ ९२ ॥
इति कामकलारूपं कीर्त्तितं तु मया तव ।
अन्यच्चैव[8] शकारन्तु शक्तिद्वयपुटं भवेत् ॥ ९३ ॥
र[9]कारस्तु महेशानि काली कामकला मनुः ।
काली कामकला देवि मुख्या हंसगता भवेत् ॥ ९४ ॥
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ।

श्रीशिव उवाच ।

गृहवास्तुं प्रवक्ष्यामि येन देव[10]मयो भवेत् ॥ ९५ ॥
ईशानादिनिर्ऋत्यन्तं वास्तुसर्पः प्रकीर्त्तितः ।
वाय्वादिवह्निपर्य्यन्तं सर्पहस्तद्वयं भवेत् ॥ ९६ ॥
पैत्र्यां पादयुगं[11] देवि ऐशान्यां शिर एव च ।
सर्पगात्रमिदं प्रोक्तं ज्ञात्वा कर्माणि कारयेत् ॥ ९७ ॥
शिरोघाताद्भवेन्मृत्युः पुच्छे[13] सर्वार्थनाशनम् ।

[1] D ° न्दुः, N ° न्दुं । [2] C B ° तौ । [3] C ततो । [4] C ° द्वंन्द्व, D ° द्धें । [5] ऊर्द्ध ° । [6] C D ° न्द्र ° । [7] D ह ° । [8] D ° च्च ह ° । [9] D ह ° । [10] B ° वी । [11] B D N ° पुटं । [13] C पूर्वे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पिण्डि[1]कायां भवेद्दुःखं क्रोडे सर्वार्थसाधनम् ॥ ९८ ॥
चलस्थिरप्रभेदेन द्विधा वास्तु प्रकीर्त्तितम् ।
नैर्ऋत्यां पूजयेद्देवि वास्तुसर्पगृहाधिपम् ॥ ९९ ॥
वास्तुपूजां विधायाथ कूर्मं ज्ञात्वा प्रयत्नतः ।
स्थानसंशोधनं कृत्वा स्वयं तु व्रत[2]वान् भवेत् ॥ १०० ॥
परान्नं च परद्रव्यं तथैव तु प्रतिग्रहम् ।
परस्त्रीं परनिन्दां च मनसाऽपि विवर्जयेत् ॥ १०१ ॥
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभिः[3] कथं सिद्धिर्वरानने ॥ १०२ ॥
प्रतिग्रहं महेशानि सर्वथा परिवर्जयेत् ।
प्रतिग्रहोत्थपापं तु शृणु यत्नेन शाम्भवि ॥ १०३ ॥
मृते तु नरकं यायात् स्वस्वकर्मानुसारतः ।
भोगोत्तरं महेशानि पितृलोकं व्रजन्ति ते ॥ १०४ ॥
ततो व्रजन्ति ते देवि सूर्यलोकं प्रतिग्रही ।
ततश्चन्द्रपुरं गच्छेत् ततश्चन्द्रत्वतां व्रजेत् ॥ १०५ ॥
भारत्वं प्राप्य देवेशि भूमौ वर्त्तेति योगतः ।
पूर्वदत्तं त[4]दन्नं हि इह प्रत्यक्षगोचरम् ॥ १०६ ॥
दत्तं विना महेशानि न पूर्त्तिः क्वापि दृश्यते ।
तदन्नं भाण्डगोपे[5]न चाग्नौ दाहत्वतां व्रजेत् ॥ १०७ ॥
पाके[6] तूदरपूर्त्त्यर्थं भुज्यते सर्वजन्तुभिः ।
यावत्तु पूर्वज[7]नुषि दत्तं दापितमेव तु ॥ १०८ ॥
तदेव प्राप्यते देवि नादत्तमुपतिष्ठते ।
नाधिकं न च वै न्यूनं प्राप्यते जन्तुभिः क्वचित् ॥ १०९ ॥

[1] C पीठि°। [2] D वस्त्र°। [3] C °पु। [4] C य°। [5] B D °तोये°।
[6] D पक्षे। [7] N °त°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तदन्नं[1] देवदेवेशि तस्य विष्ठात्वतां व्रजेत् ।
तत्र देवि कृमिर्भूत्वा तदन्ते चान्ययोनिभाक् ॥ ११० ॥
प्रतिग्रहं परित्यज्य मन्त्रसिद्धिं समाचरेत् ।
जातसूतकमादौ स्यात्तदन्ते मृतसूतकम् ॥ १११ ॥
सूतकद्वयसंयुक्तः स[2] म[3]न्त्रो नैव सिध्यति ।
जन्मसूतकजं देवि संस्कारदशकं शिवे ॥ ११२ ॥
जननादिषु गुप्तान्तं संस्कारदशकं शिवे ।
दिवसा दश वै देवि सूतके परिकीर्त्तिताः ॥ ११३ ॥
दशसंस्कारयोगेन जातसू[4]तकवारणम् ।
जपादिभोजनान्तं हि दशाङ्का[5] तु पुरस्क्रिया ॥ ११४ ॥
मृत[6]सूतकमेतद्धि दशाहं सूतकं मतम् ।
जीवहीनो यथा देही सर्वकर्म्मसु न क्षमः ॥ ११५ ॥
पुरश्चरणहीनो हि तथा मन्त्रः प्रकीर्त्तितः ।
द्वितीयं तु मया प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥ ११६ ॥

श्रीदेव्युवाच ।

विश्वेश श्रोतुमिच्छामि चक्रमष्टाष्टकाभिधम् ।
रहस्यातिरहस्यं च वद मे करुणानिधे ॥ ११७ ॥

ईश्वर उवाच ।

रहस्यातिरहस्यं हि कथ्यते गोपनं कुरु ।
उत्तमं मध्यमं चैव तृतीयमधमं भवेत् ॥ ११८ ॥
उत्तमं शिवचक्रं स्यान्मध्यमं वैष्णवं भवेत् ।
अधमं कामचक्रं स्याज्जीवचक्रमिति स्मृतम् ॥ ११९ ॥

[1] C तं दत्तं । [2] B C D द्वाभ्यां तु सहितः । [3] C त° । [4] D °मृ° । [5] B °ज्ञा । [6] C नष्ट° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जीवचक्रं तथा प्रोक्तं जीवमेरुस्तथा त्वयम् ।
पंक्त्याकारेण देवेशि चक्राकारेण वा जपेत् ॥ १२० ॥
त्रिन्दुस्थाने स्वयं स्थित्वा निर्विकल्पो जितेन्द्रियः ।
अविकारं समासाद्य पूजां कुर्य्यात्प्रयत्नतः ॥ १२१ ॥
विकारी जायमानस्तु साधको न[1]श्यति ध्रुवम् ।
त्रिशतं षष्टि देवेशि देव्यावरणशक्तयः ॥ १२२ ॥
पञ्चविंशति देवेशि पञ्चि[2]काशक्तयः क्रमात् ।
षट् षड्दर्शने प्रोक्ता षडाम्नाये तु षड् भवेत् ॥ १२३ ॥
द्रिसप्ततिर्महेशानि निर्वाणशक्तयः स्मृताः ।
त्रिशतंषष्टि देवेशि शाम्भवक्रमरश्मयः[3] ॥ १२४ ॥
योगिनीनां चतुःषष्टिकोटिरुक्ता महेश्वरि ।
षोढान्यासोदिताशेषशक्तयो याः प्रकीर्त्तिताः ॥ १२५ ॥
प्रातिशक्तौ[4] महेशानि कोटिसंख्या प्रकीर्त्तिता ।
तदष्टगुणितं कुर्य्यादष्टकं कीर्त्तितं मया ॥ १२६ ॥
सर्वत्राष्टगुणं कुर्याद्भवेदष्टाष्टकं क्रमात् ।
शैवाष्टक[5]मिदं प्रोक्तं शम्भुसाध्यं न चान्यथा ॥ १२७ ॥
प्रत्येकमष्टकोटिर्वा कलाकोटिश्च वा[6] प्रिये ।
श्रीविद्यायां कनिष्ठं स्यान्निर्वाणे[7] मध्यमं भवेत् ॥ १२८ ॥
षट्शाम्भवादिमेधान्तदीक्षायां परमेश्वरि ।
उत्तमः कथितो देवि क्रमस्त्वष्टाष्टकाभिधः ॥ १२९ ॥
अष्टाष्टकं वैष्णवाख्यं कथ्यते शृणु साम्प्रतम् ।
आवृत्तिशक्तयो देवि त्रिशतं[8] षष्टि कीर्तिताः ॥ १३० ॥
प्रत्तिशक्तौ त्वष्टशक्तिः पूजयेद्यत्नतः शिवे ।

[1] C °कं प° । [2] D °ञ्च° । [3] D °शक्त° । [4] N °न्दो । [5] D °वषट्क° । [6] D °टीश्वर° । [7] C °णं, C D °णो । [8] D द्वितीयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

द्विसहस्रं चाष्टशती त्वशीतिः शक्तयो मताः ॥ १३१ ॥
प्रत्येकाष्टगुणं चक्रं प्रोक्तमष्टाष्टकं त्विदम् ।
अष्टाष्टकमिदं प्रोक्तं पूर्वमष्टगुणं यदा[1] ॥ १३२ ॥
तदानन्दभैरवाख्यं प्रोक्तमष्टाष्टकं शिवे ।
लक्षद्वयं महेशानि चत्वारिंशत्सहस्रकम् ॥ १३३ ॥
एतद्द्विगुणितं देवि चतुर्लक्षं महेश्वरि ।
षष्टिसाहस्रकं देवि अशीतिः[2] शक्तयो मताः ॥ १३४ ॥
द्विशतं विंशतिरिति त्वानन्दाष्टकमीरितम् ।
चतुर्विंशतिसाहस्रं चत्वारिंशतिशक्तयः ॥ १३५ ॥
आवृतौ तु महेशानि त्रिशतं षष्टिरश्मयः ।
एवमेकं पूजनं तु त्वष्टावरणसंयुतम् ॥ १३६ ॥
एकाष्टकमिदं प्रोक्तमेवमष्टा[3]ष्टकं भवेत् ।
द्विसहस्रं चाष्टशतमशीतिः शक्तयो भवेत् ॥ १३७ ॥
अष्टाष्टकमिदं प्रोक्तं पञ्चपञ्चक्रमेण तु ।
पूर्णाभिषेकसंयुक्तस्तूर्ध्वाम्नायप्रदीक्षितः[4] ॥ १३८ ॥
षट्शाम्भवक्रमे देवि कुर्य्यादष्टाष्टकं क्रमात् ।
अष्टाष्टकस्य विज्ञानी शिव एव न संशयः ॥ १३९ ॥
शिरो देयं धनं देयं देया स्त्रीर्यत्नतः शिवे ।
वसुपूर्णं गृहं देयं त्विदं साधनमुत्तमम् ॥ १४० ॥
रहस्यातिरहस्यं हि गोप्याद्गोप्यं महेश्वरि ।
प्रोक्तमेतन्मया देवि किमन्यच्छ्रोतुमिच्छसि ॥ १४१ ॥
एतस्य फलबाहुल्यं मया वक्तुं न शक्यते ।
स्त्रियो देवाः स्त्रियः सृष्टिः स्त्रियः कल्याणकारिणी ॥ १४२ ॥
स्त्रीरूपं तु महेशानि यत्किंचिज्जगतीतले[5] ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

[1] B D पदम् । [2] D अमिताः । [3] D °मेका° । [4] C साम्प्रतः । [5] C D °लम् ।

CC-0.In Public Domain. Digitization by eGangotri

एका चेत् युवती पूज्या समस्तं जगतीतलम् ॥ १४३ ॥
स्त्रीणां दर्शनमात्रेण जगतीतलपूजनम् ।
कृतं भवति देवेशि नात्र कार्य्या विचारणा ॥ १४४ ॥
रूपं दृष्ट्वा तु प्रणमेद्रूपमानन्दकारकम् ।
रूपानन्दे समायाते किमन्यत्र प्रयोजनम् ॥ १४५ ॥
रूपं रूपं परं धाम रूपं रूपं परं तपः ।
रूपं रूपं परं[1] वस्तु न भूतं न भविष्यति ॥ १४६ ॥
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ।

इति श्रीशक्तिसङ्गममहातन्त्रराजे उत्तरभागे प्रथमखण्डे श्रीमदक्षोभ्यमहोग्रतारासंवादे उत्तरखण्डे अष्टाष्टकनिरूपणं नाम तृतीयः पटलः ।

[1] B समं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चतुर्थः पटलः ।

श्रीदेव्युवाच ।

अष्टाष्टकं त्वया प्रोक्तं सर्वसिद्धिकरं भुवि ।
किं सम्प्रदायमार्गेण पात्रज्ञानं च[1] कीर्त्तितम् ॥ १ ॥
तन्मे वद महादेव यद्यहं तव वल्लभा ।

श्रीशिव उवाच ।

रहस्यं च प्रवक्ष्यामि ज्ञानं संकथ्यते श्रृणु ॥ २ ॥
केरलश्चैव काश्मीरो गौडमार्गस्तृतीयकः ।
षट्पंचाशद्देशभेदात् सर्वत्र व्याप्य तिष्ठति ॥ ३ ॥
अष्टादशसु देशेषु गौडमार्गः प्रकीर्त्तितः ।
नेपालदेशमारम्य कलिङ्गान्तं महेश्वरि ॥ ४ ॥
आर्य्यावर्त्तं समारभ्य समुद्रान्तं महेश्वरि ।
केरलाख्यः क्रमः प्रोक्तस्तून[2]विंशतिदेशके ॥ ५ ॥
तदन्यदेशे देवेशि काश्मीराख्यः क्रमः शुभः ।
शंकरस्तु भवेद्बाह्यो वेदबाह्यो द्विजो यथा ॥ ६ ॥
केरलादिक्रमेणैव श्रृणु पात्रविनिर्णयम् ।
विश्वामित्रकपालं तु केरले परिकीर्त्तितम् ॥ ७ ॥
पात्रं तुम्बीकपालं तु काश्मीराख्यक्रमे भवेत् ।
महाकपालपात्रं च गौडमार्गे प्रकीर्त्तितम् ॥ ८ ॥
कपालं त्रिविधं प्रोक्तं सम्प्रदायक्रमेण च ।
महाकपालं त्रिविधं शंखशुक्तिकपर्द्दिकाः ॥ ९ ॥
कपर्द्दिकाभिधं पात्रं सर्वपात्रोत्तमोत्तमम् ।

[1] B N न, D प्र० । [2] D ° स्थान ° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सम्प्रदायक्रमेणैव महाकपालर्मीरितम् ॥ १० ॥
सामान्यार्घ्ये स्फाटिकं स्याद्विश्वामित्रं विशेषजे ।
रौप्यमर्घ्ये महेशानि सौवर्णं गुरुपात्रकम् ॥ ११ ॥
भैरवे शुक्तिपात्रं च वीरे शङ्खाभिधं भवेत् ।
शक्तिपात्रं काचभवं योगिन्यां तु कपालकम् ॥ १२ ॥
बलिपात्रं ताम्रजं च पाद्यादीनि यथाक्रमात् ।
रत्नजानि महेशानि तदभावे तु पूर्ववत् ॥ १३ ॥
केरलाख्यः क्रमः प्रोक्तः काश्मीरं शृणु पार्वति ।
सामान्यार्घ्ये महेशानि ताम्रजेन प्रकल्पयेत् ॥ १४ ॥
विशेषार्घ्ये यत्र तुम्बी किंवा स्फटिकजं च वा ।
शुक्तिजं गुरुपात्रं च घटो रौप्य[1]समुद्भवः ॥ १५ ॥
भैरवे तु कपालं स्याद्वीरे मुनिकपालजम् ।
स्फाटिकं शक्तिपात्रं च योगिन्यास्ताम्रजं भवेत् ॥ १६ ॥
बलिपात्रं काचभवं शुक्तिजं पाद्यकर्म्मणि ।
अर्घ्याचमनकर्मादौ शङ्खजं परिकीर्त्तितम् ॥ १७ ॥
अन्यानि ताम्रपात्राणि शर्करोत्थं[2] तु भोगकम् ।
शुक्तिपात्रं गौडमार्गे सामान्यार्घ्ये च वा भवेत् ॥ १८ ॥
विशेषार्घ्ये कपालाख्यमभावे स्फाटिकं भवेत् ।
स्वर्णोद्भवो घटः प्रोक्तो गुरुपात्रं तु रौप्यजम् ॥ १९ ॥
भैरवाख्यं महेशानि नारिकेलाभिधं भवेत् ।
काचपात्रं वीरपात्रं शक्तौ तु शर्करोद्भवम् ॥ २० ॥
रत्नपात्रं तु योगिन्यां बलिपात्रं तु कूर्म्मजम् ।
पाद्यादीनि महेशानि यथाकाले[3]न धा[4]रयेत् ॥ २१ ॥
भोगपात्रं तु काश्मीरे गौडे स्यादात्मपात्रकम् ।
दिव्य[5]पात्रं केरले स्यादिति पात्रस्य निर्णयः ॥ २२ ॥

[1] D रत्न°। [2] C सर्वरौप्यं। [3] D N °लाभे°। [4] B का°। [5] C दाप्य°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विज्ञानकेरले देवि श्रृणु पात्रस्य निर्णयम् ।
शुक्तिपात्रं तु सामान्ये विशेषे नारिकेलजम् ॥ २३ ॥
स्फाटिकं गुरुपात्रं च काचजन्यो घटो भवेत् ।
पात्रं[1] तुम्बी भैरवस्य[2] वीरपात्रं तु शार्करम्[3] ॥ २४ ॥
शक्तिपात्रं तु कापालं योगिन्यां ताम्रजं भवेत् ।
शङ्खजं वीरपात्रं च पाद्यपात्रं च ताम्रजम् ॥ २५ ॥
रौप्यमाचमने प्रोक्तं स्वर्णमर्घ्यादिकर्मसु ।
अथार्घ्ये मधुपर्के च तथैवाचमने शिवे ॥ २६ ॥
स्नानपात्रं रत्नजं स्याद्विज्ञानकेरले शिवे ।
केरले[4] नारिकेलेन सर्वकार्य्याणि साधयेत् ॥ २७ ॥
केवलं[5] वीरपात्रेण सर्वपात्राणि[6] कारयेत् ।
केवलं[7] स्वर्णपात्रेण सर्वपात्राणि कारयेत् ॥ २८ ॥
केवलं[8] रौप्यपात्रेण सर्वपात्राणि कारयेत् ।
अथोक्तपात्रमध्ये तु एकेन सर्वकल्पनम् ॥ २९ ॥
एकजातीयपात्रेण सर्वपात्राणि वा शिवे ।
कुर्य्याद्यत्नेन देवेशि सम्प्रदायक्रमेण च ॥ ३० ॥
कांस्यं लोहं तथा रौप्यं सौवर्णं परमेश्वरि ।
स्फाटिकं पारदोत्थं च तथा मारकतं शिवे ॥ ३१ ॥
रत्नवैडूर्य्यजं वापि नवरत्नभवं च वा ।
नारिकेलं महाशङ्खसम्भवं च यथोत्तरम् ॥ ३२ ॥
उत्तरोत्तरतः श्रेष्ठं सर्वसिद्धिप्रदायकम् ।
वृक्षेषु देवदेवेशि सर्वसिद्धिप्रदायकम् ॥ ३३ ॥
वृक्षेषु देवदेवेशि यद्यद्दा[9]रुभवं शिवे ।

[1] C N यत्र । [2] N ° वाय । [3] D शांकरं । [4] D केवलं । [5] B N केरले ।
[6] D N ° कार्याणि । [7] B केरले । [8] B केरले । [9] B ° द्रुदा ° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्रीफलोत्थं[1] खड्गजं च यथायोगेन कारयेत् ॥ ३४ ॥
अश्वत्थपत्राकारं वा कुतपाकारमेव च ।
त्रिकोणरूपं यत् पात्रं कुतपः परिकीर्त्तितः ॥ ३५ ॥
योनिरूपं कलालास्यसन्निभं सुमनोहरम् ।
सुन्दर्य्या रत्नजं पात्रं ताराच्छिन्नाविधौ स्मृतम् ॥ ३६ ॥
दलरूपं महेशानि मंत्रमात्रे प्रकीर्त्तितम् ।
अश्वत्थपत्राकारं तु विद्यापञ्चकगोचरम् ॥ ३७ ॥
क्रियानियुक्तं देवेशि त्रित्रिशक्तौ[2] प्रकीर्त्तितम् ।
त्रिशक्तिस्त्रिविधा देवि त्रितयं त्रितयं त्रिषु ॥ ३८ ॥
त्रिकोणपात्रं देवेशि मंत्रमात्रे प्रकीर्त्तितम् ।
वर्त्तुलं वैष्णवे प्रोक्तं सालम्बा[3] शिवगोचरा ॥ ३९ ॥
कपालपात्राभावे तु विश्वामित्रकपालजम् ।
तदभावे महेशानि तद्रूपं धातुगोचरम् ॥ ४० ॥
कर्त्तव्यं यत्नतो देवि बगलायां च काचजम् ।
वामदक्षक्रमेणैव विपरीतं तथा भवेत् ॥ ४१ ॥
अथवा देवदेवेशि कपालं सर्वगोचरम्[4] ।
यत्र तुम्बीकपालं तु प्रोक्तं कापालिके मते ॥ ४२ ॥
कपालपात्रं देवेशि नीलचीन[5]क्रमे मते ।
अथवा देवदेवेशि महापात्रं कपर्दिकम् ॥ ४३ ॥
पात्रमध्ये कपर्दीशस्तत्र तिष्ठति पार्वति ।
त्वरितं[6] सिद्धिदानत्वात्[7] पञ्चविद्याविधौ स्मृतम्[8] ॥ ४४ ॥
विश्वामित्रकपालं च ब्राह्मणस्य प्रकीर्त्तितम् ।

[1] D °लं च । [2] B त्रिशिरा° । [3] C सालङ्का, D N शाणं वा, B शालंखा । [4] N महापात्रं कपर्द्दिकम् । [5] D °चक्र° । [6] D तत्तत्° । [7] N °नेन । [8] N शिवे, C शुभम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तदभावे महेशानि कुलपात्रसमं परम् ॥ ४५ ॥
अर्घ्यपात्रं शुभं विद्धि सर्वसिद्धिप्रदं शिवे ।
वर्षाणां तु चतुःषष्टिस्ताम्रा[1]र्घ्ये देवता स्थिता ॥ ४६ ॥
शतं वर्षाणि रौप्ये च सहस्रं स्वर्ण[2]पात्रके ।
दशसाहस्रकं देवि स्फाटिके[3] देवता स्थिता ॥ ४७ ॥
तथा मारकते देवि रत्नजे रत्नयुग्मकम् ।
विश्वामित्रकपाले तु लक्षवर्षाणि पार्वति ॥ ४८ ॥
कपालपात्रे देवेशि दशलक्षाणि पार्वति ।
खड्गजे दशसाहस्रं मौक्तिके विंशतिः प्रिये ॥ ४९ ॥
विश्वामित्रकपाले वा कपाले वा महेश्वरि ।
देवता वरदाः सर्वाः स एव परमेश्वरः[4] ॥ ५० ॥
स धन्यः स च विज्ञानी स एव दर्शनी मतः ।
स सर्वयज्ञयाजी[5] च सर्वविद्या[6]रहस्यवित् ॥ ५१ ॥
स ब्रह्मवित् सर्वमंत्ररहस्यरूप एव हि ।
आनन्दात्मा परात्मा सः[7] सकलादिप्रभेदतः ॥ ५२ ॥
विश्वामित्रकपाले वा सर्वपात्राणि कारयेत् ।
कपर्द्यां वा महेशानि सर्वपात्राणि कारयेत् ॥ ५३ ॥
एके कपाले देवेशि सर्वपात्राणि भावयेत् ।
विश्वामित्रकपालस्य कपालस्यापि पार्वति ॥ ५४ ॥
शिवशक्त्योर्यथा ज्ञानं नहि कोऽपि विजानते ।
तथा कपालविज्ञानं नहि कोऽपि विजानते ॥ ५५ ॥
कपर्दी च भवेद्यद्यत्तदेव नारिकेलतः ।
पात्रमालां यथा[8] यन्त्रं[9] कारयेत् परमेश्वरि ॥ ५६ ॥

[1] D तम°। [2] B रौप्य°। [3] D स्फटिका। [4] B D °रि। [5] B °जापी, C राजीव। [6] D स च सर्वे°। [7] B परमात्मा, D परात्मानः। [8] B D N तथा। [9] N पत्रं।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तृतीयः स्फाटिको देवि सकलो निष्कलो मतः ।
सूर्य्याद्वह्निकरो देवि सकलः परिकीर्त्तितः ॥ ५७ ॥
पूर्वोत्तरप्रभेदेन चापरं सकलं शृणु ।
चन्द्रदर्शनमात्रेण पौर्णमायामथाश्विने ॥ ५८ ॥
सकलः कीर्त्तितो देवि जलस्रावी[1] महोत्तमः ।
कालीं तारां तर्पयेद्धि तेनामृतजलेन च ॥ ५९ ॥
केरलाख्ये सम्प्रदाये नारिकेलार्घ्यपूजनम् ।
काश्मीराख्ये सम्प्रदाये स्फाटिकार्घ्यप्रपूजनम् ॥ ६० ॥
गौडमार्गे महेशानि कपालार्घ्ये प्रपूजनम् ।
काश्मीरगौडयोर्देवि द्रव्यभेदोऽस्ति वै क्वचित् ॥ ६१ ॥
नारिकेलं समादाय सुपक्वं सुन्दरं दृढम् ।
मध्ये स्फोटं समाचर्य्य नेत्रनासासुलक्षणम् ॥ ६२ ॥
नेत्रद्वयं[2] तु संस्थाप्य चारुरूपं गुणोत्तरम् ।
नववर्ण[3]मयं कृत्वा पञ्चवर्णमयं च वा ॥ ६३ ॥
रौप्यनेत्रे स्वर्णनेत्रे नीलरत्नादिनेत्रके[4] ।
समासाद्य महेशानि तत्र नासां समाचरेत् ॥ ६४ ॥
नेत्रयुग्मस्य मध्ये[5] तु मुखं कार्य्यं महेश्वरि ।
ईदृशं सूक्ष्मरूपं च मालार्थे परिकीर्त्तितम् ॥ ६५ ॥
तद्रूपं स्फाटिकोत्थं च काश्मीराख्यमते मतम्[6] ।
त्रिकोणयोनिरूपो वा स्फाटिकः शुभदायकः ॥ ६६ ॥
गौडे कपालं संप्रोक्तं नासायां मुखमाचरेत् ।
ऊर्ध्वाम्नायः केरलः स्यात् काश्मीरः पश्चिमो भवेत् ॥ ६७ ॥
विलासाख्यो वैष्णवाख्यो दक्षिणाम्नाय एव च ।
पूर्वे चैतन्य आख्यातस्तूत्तरे गौड एव च ॥ ६८ ॥

[1] C °प्राची । [2] C °द्वन्द्वं । [3] D N रत्न° । [4] B °नीलके । [5] D °घ्यं ।
[6] D ° राद्यमनोर्मतं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विद्यासङ्केतभेदाभ्यां कपालं[1] तारिणी[2]त्रयम् ।
महाशङ्खेऽप्यसक्तश्चेत् स्फाटिक्या मालया जपेत् ॥ ६९ ॥
कपालालाभतो देवि स्फाटिकं कारयेद्ध्रुवम् ।
पात्राणां निर्णयं वक्ष्ये संख्याभेदक्रमेण च ॥ ७० ॥
सम्प्रदायक्रमेणैव पात्राणां स्थापनं शिवे ।
महाकलाकलारन्ध्रवर्णोति वेद्य भावयेत् ॥ ७१ ॥
सामान्यार्घ्यो भवेदादौ सामान्यार्घ्यो द्विधा[3] स्मृतः ।
सकलो निष्कलश्चैव सकलो द्वा[4]रपूजनात् ॥ ७२ ॥
निष्कलः केवलो यश्च निष्कलः सर्वगोचरः ।
सामान्यार्घ्यद्वयं देवि घटश्चैव तृतीयकः ॥ ७३ ॥
विशेषार्घ्यश्चतुर्थः स्याद्गुरुपात्रं तु पञ्चमम् ।
दिव्यौघाख्यं च संप्रोक्तं सिद्धौघाख्यं रसाभिधम् ॥ ७४ ॥
मानवौघाभिधं देवि सप्तमं परिकीर्त्तितम् ।
गुरुपात्रं ततः प्रोक्तं भैरवाख्यं च रन्ध्र[5]कम् ॥ ७५ ॥
शक्तिपात्रं च दशमं वीरपात्रं शिवा[6]भिधम् ।
ततः श्रीयोगिनीपात्रं सूर्य्यसंख्याभिधं भवेत् ॥ ७६ ॥
नव वै बलिपात्राणि सकलादिप्रभेदतः ।
बल्यर्पणाभिधं पात्रं सकलं परिकीर्त्तितम् ॥ ७७ ॥
निष्कलानि महेशानि बटुकादीनि सिद्धयः ।
बटुको योगिनीक्षेत्रं गणपाः परमेश्वरि ॥ ७८ ॥
सर्वभूतानि देवेशि ताराक्षोभ्यस्तथैव च ।
पाद्यत्रयं तथा देवि प्रोक्तमाचमनीयकम् ॥ ७९ ॥
अर्घ्यपात्रत्रयं देवि मधुपर्के त्रयं भवेत् ।

[1] B रूपाणां । [2] D भाविनी ° । [3] B ° मान्यो द्विविधः, D ° मान्यादिविधौ ।
[4] C D हा ° । [5] D वद्ध ° । [6] D ° रा ° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पञ्चामृते पञ्चकं च स्नानार्थं गुणसंख्यकम् ॥ ८० ॥
ततस्तु प्रोक्षणीपात्रं करक्षालनजं ततः ।
गन्धपात्रं पुष्पपात्रं ततो नैवेद्यपात्रकम् ॥ ८१ ॥
शुद्धोदकाभिधं पात्रं भो[1]गात्मपात्रकं ततः ।
ततः पाच[2]कपात्रं तु ततो नीराजनादिकम् ॥ ८२ ॥
स्थानीयपीठपात्रं च दीपपात्रचतुष्टयम् ।
घृततैले दक्षवामे सौगन्ध्यम[3]दने तथा ॥ ८३ ॥
पात्राणां च चतुःषष्टिः संख्या प्रोक्ता तु केरले ।
काश्मीरे पीठमेवं[4] स्यात् कलासंख्यानि वै शृणु ॥ ८४ ॥
दिव्योत्तमोत्तमौ प्रोक्तौ सद्यः सिद्धिकरौ परौ ।
अथ षोडशपात्राणि शृणुष्व[5] परमेश्वरि ॥ ८५ ॥
सामान्यार्घ्यं विशेषार्घ्यं श्रीपीठं[6] गुरुपात्रकम् ।
भैरवाख्यं पञ्चमं तु वीरपात्रं रसाभिधम् ॥ ८६ ॥
शक्तिपात्रं योगिनीं च बलिपाद्ये[7] तथैव च ।
[8]आचमनीयाख्यपात्रं चार्घ्यपात्रं तथैव च ॥ ८७ ॥
मधुपर्काभिधं पात्रं पञ्चामृतमनन्तरम् ।
स्नानपात्रं हस्तशुद्धिपात्रं च प्रोक्षणीं तथा ॥ ८८ ॥
पात्रं षोडशकं प्रोक्तं केरले पश्चिमेऽपि च ।
मधुपर्कोत्तरं देवि शङ्खेति कौलिकेऽपि च ॥ ८९ ॥
चिदानन्दसम्प्रदाये शृणु पात्राणि पार्वति ।
सामान्यं च विशेषं च कलशं गुरुपात्रकम् ॥ ९० ॥
भोगपात्रं शक्तिपात्रं योगिनीवीरपात्रके ।
बलिपाद्याचमनीयं च अर्घ्यस्नाना[9]भिधं प्रिये ॥ ९१ ॥

[1] D भा°। [2] D पीठ°, [याच]। [3] D न्धामो°। [4] D °मात्रं। [5] D त्वं। [6] C °खण्डो, N °घटो, D °पात्रं। [7] N °द्यं। [8] This line appears only in N. [9] D °स्तारा°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

देवीशङ्खेति देवेशि पात्राण्येवं तु षोडश ।
अथवा कलशं शङ्खं शक्तिपात्रत्रयं भवेत् ॥ ९२ ॥
श्रीगुरुभोगपात्राणि त्रिषु पात्रेष्वयं विधिः ।
आन[1]न्दाख्ये[2] मते देवि पात्राणि कीर्त्तितानि च ॥ ९३ ॥
सामान्यार्घ्यो विशेषार्घ्यो घटः श्रीगुरुभोजनात् ।
शक्तिपात्रं योगिनी च वीरपात्रं बलिस्तथा ॥ ९४ ॥
पाद्यमाचमनीयं च भोगचाराभिधे भवेत् ।
देवीपात्रं श्रीगुरुश्च भोगश्च योगिनी तथा ॥ ९५ ॥
बलिपात्रं शक्तिपात्रं वीरपात्रं[3] तथैव च ।
तथाचमनपात्रं च चिदानन्देष्वयं विधिः ॥ ९६ ॥
देवीगुरुभोगपात्रं योगिनीब्रह्म[4]शक्तिजम् ।
सिद्धचैतन्यमार्गस्य पात्राणि परमेश्वरि ॥ ९७ ॥
योगिनीवीरपाद्यादि पंचचक्रमते भवेत् ।
आनन्दवीरदेवस्य क्रमः प्रोक्तो महेश्वरि ॥ ९८ ॥
सामान्यार्घ्यो विशेषार्घ्यः कलशो गुरुभैरवः ।
एते[5] सर्वादौ संप्रोक्ताः सामान्यपरिभाषया ॥ ९९ ॥
बलिः पाद्याचमनीये च अर्घ्येति नव पार्वति ।
पंचमानन्दनाथस्य मार्गः प्रोक्तो मया तव ॥ १०० ॥
पंचकं भोगशक्ती च विश्वरूपाभिधे[6] भवेत् ।
देवीगुरुभोगशक्तियोगिनीवीरपात्रकम् ॥ १०१ ॥
बलिः पाद्याचमनीये च अर्घ्येति योगरूपजे ।
सृष्टिसंहारमार्गेण परिवर्त[7]क्रमेण च ॥ १०२ ॥
ओड्यानं[8] चतुरस्रं च कामरूपं च वर्त्तुलम् ।

[1] B C N न॰। [2] B C N add तु। [3] B ॰द्ये। [4] B ॰बलि॰, C D ॰वर्ण॰। [5] B इति। [6] B ॰पविधौ। [7] B ॰र्ग॰ [8] D उत्तानं, उड्डानं।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जालन्धरं त्वर्धचन्द्रं न्यस्त्वः **पूर्णगिरि**र्भवेत् ॥ १०३ ॥
शङ्खमंत्र[1] भोगपूजाबलिपात्राणि पंच च।
स्वदक्षिणादिवामान्तं संस्थाप्य पूजयेच्छिवाम् ॥ १०४ ॥
कुलनाथमतं प्रोक्तं भैरवस्य मतं शृणु।
स्ववामभागे देवेशि अर्घ्यादिस्थापनक्रियाम्[2] ॥ १०५ ॥
पाद्यार्घ्याचमनीयानि सामान्यार्घ्यविशेषकम्।
सामान्यार्घघटो देवि श्रीपात्रं देवताग्रके[3] ॥ १०६ ॥
स्ववामे कलशस्याङ्के मधुपर्को महेश्वरि।
तद्दक्षिण आचमनीयं पाद्यं यत्नेन संचरेत् ॥ १०७ ॥
निवापा[4]ख्यमतं प्रोक्तं संक्षेपेण महेश्वरि।
अथ वक्ष्यामि देवेशि **शम्भुनाथ**मतं शृणु ॥ १०८ ॥
आदौ कुम्भं तथा शङ्खं श्रीपात्रं शक्तिपात्रकम्।
गुरुपात्रं भोगपात्रं बलिपाद्यादिपात्रकम् ॥ १०९ ॥
योगिनीवीर[5]पात्रं च वामावर्त्तक्रमेण च।
सामान्यार्घ्यघटं चैव श्रीपात्रं तदनन्तरम् ॥ ११० ॥
श्रीपात्रघटयोर्मध्ये सर्वपात्राणि पातयेत्।
गुरुपात्रं घटस्यान्ते तदन्ते भोगपात्रकम् ॥ १११ ॥
तदन्ते शक्तिपात्रं च योगिनीनां तु पात्रकम्।
तदन्ते वीरपात्रं च तदन्ते बलिपात्रकम् ॥ ११२ ॥
पाद्यं चाचमनीयञ्च तदन्ते चार्घ्यपात्रकम्।
पुनराचमनीयं च मधुपर्कस्तथैव च ॥ ११३ ॥
स्नानीयं प्रोक्षणी चेति काश्मीराख्ये कलाभिधाः।
करक्षालनजं चैव तथा पञ्चामृतेति च ॥ ११४ ॥
तदाष्टादश पात्राणि काश्मीराख्यमते शिवे।

[1] D ° मार्गो। [2] C ° क्रयी। [3] D ° त्मके। [4] B C N ° सा °।
[5] C N रस °।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सामान्यार्घ्यविशेषार्घ्यौ श्रीघटः परमेश्वरि ॥ ११५ ॥
घटान्ते गुरुपात्रं च तदन्ते भैरवाभिधम् ।
शक्तिपात्रं ततः प्रोक्तं वीरपात्रं ततः शिवे ॥ ११६ ॥
बलिपात्रं योगिनी च पान[1]पात्रं तथैव च ।
भोगपात्रं च देवेशि नव पात्राणि पार्वति ॥ ११७ ॥
पाद्यादीनि महेशानि सामान्यत्वेन पश्चिमे ।
तद्दक्षिणे पाद्यपात्रमर्घ्यमाचमनीयकम् ॥ ११८ ॥
प्रोक्षणीति महेशानि स्थापयेदाद्यवत् शिवे ।
गुरुपात्रं तत्पदाभ्यां भैरवं बटुकेन च ॥ ११९ ॥
शक्तिपात्रं भुवनेश्या वीरपात्रं शिवेन च ।
बलिपात्रं गणेशाद्यैर्योगिन्यां तन्मनु[2]र्भवेत् ॥ १२० ॥
अन्यानि प्रणवेनैवं सर्वपात्रेष्वयं विधिः ।
विशेषार्घ्येण दिव्यौघान् गुरुपात्रे गुरून् यजेत्[3] ॥ १२१ ॥
पुरुषं भैरवेणैवं श्रीपात्रेणाऽमृतेश्वरि[4] ।
मूलदेवीपदे देवी प्रोक्ता तु मूलशारदा ॥ १२२ ॥
आनन्दभैरवं देवं भैरवेन प्रतर्पयेत् ।
बलिना तु गणेशादीन् योगिन्या योगिनीं शिवे ॥ १२३ ॥
हृदि देवीं विशेषेण श्रीपात्रेण तु सावृतिम् ।
विशेषेण हृदा प्रोक्तः प्रोत्सर्गः[5] श्रीजलेन च ॥ १२४ ॥
अन्येषां चैव सामान्यपात्रेण परमेश्वरि ।
वीरपात्रेण लोकेशाः शक्त्या ब्राह्म्यादिमातरः ॥ १२५ ॥
विशेषपात्राद्या[6] पूजा सा पूजा[7] सर्वतोत्तमा ।
प्रत्यावृत्तौ महेशानि देवताभ्यो निवेदनम् ॥ १२६ ॥

[1] B C N °चात्म°। [2] D नो°। [3] B D ततः, N जपेत्। [4] B D °ण महेश्वरि। [5] B D सर्वेषां, C सद्यः। [6] D °त्रयोः। [7] D सर्वत्र।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्राणायामप्रमाणं च[1] षडङ्गध्यानके ततः ।
पुनरावरणं पूज्यं पञ्च षोडश वै दश ॥ १२७ ॥
जपं कृत्वा सन्निवेद्य प्राणायामादिपूर्वकम् ।
पुनरावरणं पूज्यं प्रोक्तमावरणक्रमः ॥ १२८ ॥
एवं क्रमेण देवेशि सर्वावृतिं प्रपूजयेत् ।
प्रत्यावृत्तो प्रोक्तमुद्रां दर्शयेद्विधिपूर्वकम् ॥ १२९ ॥
अनुक्तमुद्रावरणे तदायुधमयी भवेत् ।
संघट्टना योनिमुद्रा खेचरी च तदायुधा ॥ १३० ॥
यदावरणसंक्षेपस्तदावरणमयी च सा ।
विस्तारश्चेत् महेशानि संघट्टाद्यास्तदन्तकाः १३१ ॥
पुनः पुष्पाञ्जलिं दत्त्वा सायुधेति सवाहना ।
सशक्ती च[2] समुद्रा च ससिद्धी च समुच्चरेत् ॥ १३२ ॥
सम्प्रदायत्रयेऽपि स्यात्काण्डानुक्रमयो ह्ययम् ।
सामान्यार्घ्यघटे देवि विशेषार्घ्यस्तृतीयकः ॥ १३३ ॥
पात्रत्रयक्रमेणैव पूजनं वा भवेत् शिवे ।
सामान्यं च विशेषं च श्रीघटश्च तृतीयकः ॥ १३४ ॥
केवलं तु विशेषेण पूजनं तु[3] महेश्वरि ।
गौडमार्गे महेशानि पात्राणां निर्णयं शृणु ॥ १३५ ॥
सामान्यं द्वितयं देवि द्वार[4]देशान्तमार्गतः ।
देवाग्रे तु विशेषार्घ्यो घटान्ते गुरुपात्रकम् ॥ १३६ ॥
श्रीपात्रसंज्ञा देवेशि विशेषार्घ्ये प्रकीर्त्तिता ।
भोगपात्रं ततो देवि शक्तिपात्रं ततः शिवे ॥ १३७ ॥
योगिनीवीरपात्रे तु[5] बलिपात्रं[6] ततः शिवे ।

[1] B C D मं समाचर्य्ये । [2] B D N °क्तिक । [3] C या । [4] B विहार° ।
[5] C °षु । [6] D N °द्ये ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आचमनीयं महेशानि प्रोक्तमन्यद्विशेषतः ॥ १३८ ॥
अर्घ्यत्रयं गुरोः पात्रं भैरवीपात्रकं ततः ।
शक्तिपात्रं योगिनी च बलिपात्रं ततः शिवे ॥ १३९ ॥
अर्घ्यस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं भवेत् ।
आचमने[1] त्रयं देवि मधुपर्क[2]स्ततः शिवे ॥ १४० ॥
स्नानीयं करशुद्धिश्च यजु[3]र्गौडे विधिः स्मृतः ।
स्वदक्षे प्रोक्षणीपात्रं आदायाद्भिः प्रपूरयेत् ॥ १४१ ॥
किंचिदर्घ्याम्बु[4] संगृह्य प्रोक्षण्य[5]म्भसि योजयेत् ।
ततः साधारकं पात्रं पुरतः स्थापयेद्बुधः ॥ १४२ ॥
तत्पार्श्वे पाद्यदानं च तत्पार्श्वे चार्घ्यदानकम् ।
आचमनीयं च तत्पार्श्वे वामे तु मधुपर्ककम् ॥ १४३ ॥
पुनराचमनीयं च स्नानीयं तत् क्रमान्न्यसे[6]त् ॥
गन्धपुष्पं तथा दक्षे पृष्ठे तु[7] करक्षालनम् ॥ १४४ ॥
स्ववामे स्थापयेत् कुम्भं वामहस्तेन धारयेत् ।
"ॐ आँ" इति च मंत्रेण पार्श्वे धृत्वा च तज्जलम् ॥ १४५ ॥
"नु[8]क्षौर" इति मंत्रेण देवतीर्थेन संस्पृशेत् ।
आ[9]त्मानं यागवस्तूनि गन्धपुष्पादिकानि च ॥ १४६ ॥
प्रोक्षयेत्[10] प्रोक्षणीतोयैर्गायत्र्या मूलमन्त्रतः ।
साध्यसाधकयोर्मध्ये षट्त्रिंशदङ्गुलं भवेत् ॥ १४७ ॥
द्वादशाङ्गुलमूर्द्ध्वं च अधोभागे तथाङ्गुलम् ।
द्वादशाङ्गुलमध्यस्य तत्र संस्थापयेद्बुधः ॥ १४८ ॥
आत्मनः पुरतो वामे त्रिकोणं विलिखेद्भुवि ।
सार्धद्वादश वै देवि चार्घ्या[11]र्थं द्वादश प्रिये ॥ १४९ ॥

[1] C D N °नीये । [2] B °र्कं तथा । [3] D यद् यद्, B N पंच° । [4] D र्घ्येंषु, N र्घ्यांनु° । [5] D °क्तान्य° । [6] C त्यजे° । [7] D वा । [8] B D न । [9] D स्वा° । [10] N °णे । [11] B E °र्घ्यें ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आराध[1]नं स्थापनं च पूजनं पूरणं तथा ।
गन्धपुष्पे मण्डल[2]स्य विन्यासः पुष्पसंश्रयः ॥ १५० ॥
अमृतीकरणं पात्रं प्रतिपत्तिरियन्नव ।
सामगौडे विधिरयं संक्षेपेण प्रकाशितः[3] ॥ १५१ ॥
पात्राणां विंशतिः शिवे सामगौडे विधिः शिवे ।
आद्यत्रयं गुरुर्भोगः शक्तिश्च योगिनी शिवे ॥ १५२ ॥
वीरपात्रं बलिपात्रं पाद्यार्घ्याचमनीयकम् ।
करक्षालनपात्रं च मूलानां च प्रवर्तकम् ॥ १५३ ॥
सामान्यार्घ्यादाचमान्तमर्घ्यं च करशुद्धिजम् ।
उच्छिष्टबलिपात्रं च बलिपात्राणि सप्त च[4] ॥ १५४ ॥
अथ पाचक[5]पात्रं च क्रूरगौडे विधिः शिवे[6] ।
एकविंशतिपात्राणि गौडे चैवात्र सन्ति च ॥ १५५ ॥
शाक्ते प्रोक्तमिदं देवि वीरशाक्ते तु शङ्करि[7] ।
शङ्खं न मुख्यं[8] देवेशि शैवे शाक्ते न कारयेत् ॥ १५६ ॥
लोक[9]सन्दर्शनार्थं[10] तु शङ्खस्य स्थापनं चरेत् ।
शैवे पङ्क्तिक्रमेणैव पात्राणां स्थापनं चरेत् ॥ १५७ ॥
सामान्यार्घ्यो विशेषश्च घटश्च पाद्यपात्रकः ।
आचमनीयं तथार्घ्यं च पुनराचमनीयकम् ॥ १५८ ॥
मधुपर्कामृते देवि स्नानीयं प्रोक्षणी तथा ।
शक्तियुक्तो यदा शम्भुस्तदा कलशपूजनम् ॥ १५९ ॥
नो चेत्तु जलवत्[11] स्थाप्य पूज्यो वैदिककर्मणा ।
पूर्णदीक्षाप्रयुक्तश्चेच्छक्तिपात्रादिकं चरेत् ॥ १६० ॥

[1] D °वाह° । [2] D °प° । [3] D शिता, C °शते । [4] B °त्रं च सप्तम । [5] B याच°, N पाव° । [6] C स्मृतः । [7] B सङ्करी, D N °रम । [8] D शून्यो । [9] D °के । [10] B °सन्देशार्थं । [11] B °मव° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

बिल्वपात्रेण देवेशि विश्वामित्रेण वाचरेत् ।
वैष्णवे तु महेशानि पुरः सामान्यपात्रकम् ॥ १६१ ॥
शङ्खपात्रं वामभागे स्वस्य देव[1]स्य पार्वति ।
पूजाद्रव्यं दक्षभागे तन्मध्ये परमेश्वरम् ॥ १६२ ॥
वैष्णवे देवदक्षे तु शङ्खं तद्दिक्षु पार्वति ।
पाद्यार्घ्याचमनीयं च मधुपर्कं क्रमाद्भवेत् ॥ १६३ ॥
तदुदकषट्पात्रं च जलसंस्थापनाय च ।
सिद्ध[2]कल्पितदिङ्मार्गाद्वामदक्षे घटो भवेत् ॥ १६४ ॥
शक्तियुक्तवैष्णवस्य प्रोक्तमेतन्मया तव ।
अयुक्तस्य महेशानि न सामान्यघटो भवेत् ॥ १६५ ॥
विशेषदीक्षितश्चेत्स्याच्छक्तिवीरादि कारयेत्[3] ।
शैवे[4]पि स्वस्य दक्षात्तु सामान्यात्प्रोक्षणीति च ॥ १६६ ॥
तदन्ते स्थापयेद्देवि सौरे[5] शृणु महेश्वरि ।
सौरे गौडे च सामान्याद्द्वावर्घ्यौ[6] सूर्य्यगोचरौ ॥ १६७ ॥
विशेषात् प्रोक्षण्यन्तं च स्थापयेत्परमेश्वरि ।
जैने बौद्धे तु तारावद्भैरवे कालिकाविधिः ॥ १६८ ॥
दर्शनायतने देवि विशेषार्घ्यघटादिकम् ।
प्रोक्षण्यंतं समासाद्य केरलादिक्रमेण च ॥ १६९ ॥
गणेशे चोभयं देवि शङ्खस्त्वाचमने भवेत् ।
सामान्यार्घ्ये भवेद्द्वारि सामान्यं च विशेषकम् ॥ १७० ॥
श्रीपात्रमिति देवेशि चार्घ्ये स्वायंभुवेऽपि च ।
गणेशवत्प्रकर्त्तव्यं नान्यथा शा[7]ङ्करं वचः ॥ १७१ ॥
सर्वत्र शक्तियोगैश्च शाक्त[8]वत्[9] परमेश्वरि ।

[1] D धर्म॰ । [2] D ॰द्धि॰ । [3] C ॰रो हि कारयेत्, B D ॰वीरौ यजेच्छिवे ।
[4] D सौरे॰ । [5] B शैवे । [6] B ॰द्वीरार्घ्ये, C N द्वारार्घ्यौ । [7] C श॰ ।
[8] B D शक्ति॰ । [9] D ॰युक् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वामावर्त्तक्रमेणैव गौडे कौले तु पात्रकम्[1] ॥ १७२ ॥
काश्मीरे दक्षवदने केरले मण्डल[2]क्रमात् ।
केवलं शङ्खमात्रेण केरले चरितार्थता ॥ १७३ ॥
पूजोपकरणं दक्षे पृष्ठे नैवेद्यमेव च ।
करक्षालनपात्रं तु स्वपृष्ठे परिकीर्त्तितम् ॥ १७४ ॥
घृतदीपो भवेद्दक्षे तैलदीपो हि वामतः ।
त्रिकोणाकारतो वापि वह्निचक्रक्रमेण च ॥ १७५ ॥
मेधादीक्षाविधौ देवि स्थापनं परिकीर्त्तितम् ।
सर्वपात्राणि संस्थाप्य स्ववामे तु घटोत्तरे ॥ १७६ ॥
घटस्य तु मुखं देवि परितः परिकीर्त्तितम् ।
शङ्खस्य देवी शङ्खस्य मुखे तु देवताग्रतः ॥ १७७ ॥
"पूजयामि तर्पयामि नमो"ऽन्तं केरले मतम्[3] ।
"तर्पयामि पूजयामि नमः" काश्मीरगोचरः ॥ १७८ ॥
हृदयस्यास्य योगे तु साम्राट्केरल ईरितः ।
"पूजयामि नमो देवि तर्पयामि नम"स्तथा ॥ १७९ ॥
आदिकेरलसाम्राज्ये[4] महत्पूर्वादि कीर्त्तितम् ।
नमः पूजा तर्पणे तु केरले परमेश्वरि ॥ १८० ॥
पूर्णानन्दश्चिदानन्दो बोधानन्दः प्रकीर्त्तितः ।
अष्टौ भेदा महेशानि हृदाद्यन्तप्रयोगतः ॥ १८१ ॥
मध्य[5]योगादपि शिवे समेदा[6]: परिकीर्त्तिताः ।
आदौ मध्ये तथा चान्ते बलिदानं तु गौडके ॥ १८२ ॥
आदौ च बलिदानं च काश्मीरे परिकीर्त्तितम् ।
अन्ते बलिः केरले तु केवलं तर्पणं यदि ॥ १८३ ॥

[1] B °काः । [2] D °लमुत्तर° । [3] B N च मे । [4] C N ° ज्यं ।
[5] C D मद्य° । [6] B सु°, D स्व° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विला[1]साख्यस्तदा देवि पूजनं तर्पणं च वा ।
विश्वरूप[2]विधौ देवि केरले पूजने सति ॥ १८४ ॥
श्रीपूर्वा[3] पादुका वापि केवलापादुकापि वा ।
तद्देवतातर्पणं वा ह्रस्वं दीर्घं च वा प्रिये ॥ १८५ ॥
सबिन्दुं वा महेशानि संपूर्णं वा समाचरेत् ।
चीनमार्गेऽपि तारिण्यां मंजुघोषेऽपि पार्वति ॥ १८६ ॥
"वज्रपुष्पं प्रतीच्छे"ति स्वाहान्तेन प्रपूजनम् ।
वामावर्त्तक्रमेणैव दक्षवामक्रमेण च ॥ १८७ ॥
केवलं दक्षावर्त्तेन केवलं वामहस्ततः ।
भेदाष्टत्रिं[4]शतिः शिवे कीर्त्तितः परमेश्वरि ॥ १८८ ॥
केवलानन्दयोगेन केवलानन्दयोगतः ।
आनन्दनाथयोगेन नाथानन्दक्रमेण च ॥ १८९ ॥
सिद्धमानव[5]दिव्यादिप्रज्ञाचैतन्यबोधतः ।
विलास[6]क्रमयोगेन तथा सरस्वतीक्रमात् ॥ १९० ॥
वक्ष्यमाणक्रमेणैव भेदबाहुल्यमीरितम् ।
इति संक्षेपतः प्रोक्तं विशेषः कथ्यते प्रिये ॥ १९१ ॥

इति श्रीशक्तिसङ्गममहातन्त्रराजे उत्तरभागे प्रथमखण्डे श्रीमदक्षोभ्यतारासंवादे पात्रनिर्णयकथनं नाम चतुर्थः पटलः ॥ ४ ॥

[1] D °ना°। [2] C N °पूजा°। [3] D N °र्वे°। [4] B D N °श्चतुः। [5] N ° व्योम च। [6] D °नाश°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पञ्चमः पटलः ।

श्रीदेव्युवाच ।

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।

श्रीशिव उवाच ।

रहस्यातिरहस्यं च कथ्यते श्रृणु पार्वति ॥ १ ॥
सद्र[1]ह्मवासनां कृत्वा[2] पूर्वं परशिवस्थिता ।
ध्यानस्य संश्रुतिर्जाता सा ब्रह्मवासनागता ॥ २ ॥
यदारभ्य परं रूपं विज्ञानं सुमनोहरम् ।
रूपं धृतं[3] महेशानि तदारभ्य प्रपंचता ॥ ३ ॥
यदि कादिमतं चैकं वर्त्तते परसुन्दरि ।
तदा पुमांसः सर्वेऽपि महाकालस्वरूपिणः ॥ ४ ॥
सर्वाः स्त्रियो महेशानि कालीतारामया[4]: स्मृता[5]: ।
एवं बुद्धिर्यदा चेत्स्यान्नहि[6] संसारकल्पना ॥ ५ ॥
संसारोत्पत्तिकार्य्यार्थं प्रपञ्चोऽयं विनिर्म्मितः ।
शाक्तं शैवं गाणपत्यं[7] वैष्णवं सौरबौद्धकम् ॥ ६ ॥
एवं क्रमेण देवेशि मतमेतद्विनिर्मितम् ।
मतानि बहुसंख्यानि तदारभ्य महेश्वरि ॥ ७ ॥
संजातानि महेशानि प्रपञ्चार्थं हि निश्चितम् ।
अम्भोधिर्जलधि[8]श्चैव समुद्रः सागरो यथा ॥ ८ ॥
यथा एते तु पर्य्यायास्तथैतानि मतानि च ।

[1] B ब्र॰ । [2] B ॰नाकुला । [3] D सूते॰ । [4] D ॰यी । [5] C श्रृणु ।
[6] B तर्हि । [7] D ॰तं । [8] C ॰द॰ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वैदिके शक्तिनिन्दा च शैवे वैष्णवनिन्दनम् ॥ ९ ॥
वैष्णवे गणनिन्दा च गाणपे सौरनिन्दनम् ।
सौरे चान्द्रस्य निन्दा च चान्द्रे बौद्धस्य निन्दनम् ॥ १० ॥
स्वा[1]यम्भुवस्य निन्दा च बौद्धमार्गे महेश्वरि ।
सौभर्यां चीननिन्दा च चीने जैनस्य निन्दनम् ॥ ११ ॥
पौराणे जैननिन्दा च जैने पौराणनिन्दनम् ।
पौ[2]राणे मन्त्रशास्त्रस्य निन्दनं परमेश्वरि ॥ १२ ॥
धर्मशास्त्रे महेशानि तथा कौलिकनिन्दनम् ।
एवं भिन्नमतान्येवं संजातानि महेश्वरि ॥ १३ ॥
वेदानां शास्त्र[3]बाहुल्यं[4] प्रपंचार्थं महेश्वरि ।
एवं निन्दासमापन्ने भेदे जाते महेश्वरि ॥ १४ ॥
नैकत्र तु मनो लग्नं कस्यचित्परमेश्वरि ।
सर्वत्रान्योन्यनिन्दा च तदैक्यं न[5] प्रजायते[6] ॥ १५ ॥
तदैक्यस्य सुसिद्ध्यर्थं प्रपंचार्थं प्रकीर्त्तितम् ।
भिन्नं भिन्नं प्रशंसन्ति निन्दन्ति च परस्परम् ॥ १६ ॥
न विद्यासिद्धिमाप्नोति संभ्रमन्ति[7] पिशाचवत् ।
अन्योन्यैर्यदि निन्दा न[8] तदैक्यं च प्रजायते ॥ १७ ॥
तदैक्यस्य सुसिद्ध्यर्थं कालिकां तारिणीं यजेत् ।
पुनर्वै दैत्यनाशाय भक्तानुग्रहणाय च ॥ १८ ॥
सुन्दरं क्रूरमत्युग्रं रूपं संबिभ्रती शिवा ।
रूपमेतत् प्रपंचार्थं कीर्त्तितं तु मया तव ॥ १९ ॥
पुराणन्यायमीमांसासांख्यपातञ्जलस्तथा[9] ।
वेदान्तो व्याकृ[10]तिर्देवि धर्म्मशास्त्राङ्गमिश्रिताः ॥ २० ॥

[1] B स्व°। [2] B पु°। [3] B D °ख°। [4] B वहुला शाखा। [5] D च।
[6] N कीर्त्तितं। [7] D मन्त्रमस्ति। [8] B N निन्दति। [9] C N B °लेत°। [10] D °ह°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

छन्दो ज्योतिर्वैद्यकादि[1] विद्या एताश्चतुर्दश ।
प्रपञ्चार्थं मया प्रोक्तमेकत्वं परिणामजे ॥ २१ ॥
प्रकृतं कथ्यते देवि शृणु सावहिता भव ।
चतुर्वेदेश्वरी[2] प्रोक्ता श्रीमहाभवतारिणी ॥ २२ ॥
अथर्ववेदाधिष्ठात्री श्रीमहाकालिका परा ।
विना कालीं विना तारां नाथर्वणविधिः क्वचित् ॥ २३ ॥
केरले कालिका प्रोक्ता काश्मीरे त्रिपुरा मता ।
गौडे तारेति संप्रोक्ता सैव लोकोत्तरा[3] भवेत् ॥ २४ ॥
हादौ त्रितयमेतद्धि संक्षेपेण प्रकीर्त्तितम् ।
अथ कादौ केरले तु त्रिपुरा सा प्रकीर्त्तिता ॥ २५ ॥
काश्मीरे तारिणी बाला गौडे काली प्रकीर्त्तिता ।
शिवदेवी परा जाता दक्षिणामूर्त्तिभेदतः ॥ २६ ॥
अथानन्दभैरवाख्यमतभेदेन पार्वति ।
देवीसकाशाद्या प्राप्ता स्वगुर्वन्तं तु शक्तितः ॥ २७ ॥
शक्तेः परम्परा या तु न विच्छिन्ना महेश्वरि ।
तन्नामाज्ञाक्रमेणैव ज्ञेया देवी परंपरा ॥ २८ ॥
शम्भोः सकाशाद्या प्राप्ता स्वगुर्वन्तं महेश्वरि ।
तन्नामाज्ञाक्रमेणैव सा शिवस्य[4] परंपरा ॥ २९ ॥
दक्षिणामूर्त्तितो देवि स्वगुर्वन्तक्रमेण च ।
तन्नामाज्ञाक्रमेणैव सा वै तस्य परंपरा ॥ ३० ॥
अविच्छिन्ना यदा सा वै चतुःशङ्कर[5]योगतः ।
तदान्यः सम्प्रदायो हि भविष्यति महेश्वरि ॥ ३१ ॥
केरलश्चैव काश्मीरो गौडश्चैव तृतीयकः ।

[1] D वेंदसाङ्गा । [2] D त्रयी । [3] C तदा । [4] B तु तस्य, D ° धकस्य ।
[5] B संस्कार ° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चतुर्णामपि देवेशि त्रितयं तिष्ठति[1] प्रिये ॥ ३२ ॥
''गृह्णामि च प्रगृह्णीयात्''[2] विलासे पानकर्म्म च ।
''जुहोमि च जुषस्वे''ति[3] केरले पानकर्म्म च ॥ ३३ ॥
''होष्यामि प्रजुषस्वे''ति काश्मीरे पानमीरितम् ।
सदा मत्तो भवेन्नाथो विद्यासिद्धादिपानतः ॥ ३४ ॥
अनुक्रमेण त्रितये पूजानन्दी यदा नरः ।
नन्दनाथी च संप्रोक्तस्तद्रूपो यस्तु मानवः ॥ ३५ ॥
महानन्दाभिधः प्रोक्तो गौडे पानक्रमं श्रृणु ।
वामहस्तात् पानपूजा क्रमाद्वामी प्रकीर्त्तितः ॥ ३६ ॥
दक्षहस्तात् पानयोगाद्वामहस्तप्रतर्पणात् ।
दक्षहस्तात्पूजनाद्धि **कौल** इत्यभिधीयते ॥ ३७ ॥
केवलं दक्षहस्तेन पूजनाद्दक्षिणाभिधः ।
स एव केरलः प्रोक्तः शुद्धमार्गः प्रकीर्त्तितः ॥ ३८ ॥
दक्षिणामूर्त्तिभेदे तु[4] दिव्यौघादित्रयं भवेत् ।
तद्भेदेन त्रिभेदत्वं प्रत्येकं नवभेदता[5] ॥ ३९ ॥
आनन्दभैरवमते पञ्चाशीतिगुरुक्रमः[6] ।
दिव्यसिद्धमानवादि पञ्चाशीतिः प्रकीर्त्तितः ॥ ४० ॥
प्रत्येकं त्रितयत्वेन सप्तसप्तक्रमेण[7] तु ।
पंचषष्ठी तु संप्रोक्ता नामाज्ञा तत्क्रमेण च ॥ ४१ ॥
नवनाथक्रमेणैव नव भेदा भवन्ति च ।
चतुरशीतिसिद्धानां क्रमदीक्षाप्रभेदतः ॥ ४२ ॥
चतुरशीतिभेदाश्च तन्नामाज्ञाक्रमेण च ।
ऋणं धनं च विज्ञाय नामाज्ञां दापयेद्गुरुः ॥ ४३ ॥

[1] D त्रितयं । [2] B C N °ण्हामि । [3] D चक्षुषा चेति । [4] B N °न ।
[5] D भवेत्तदा । [6] N °मे । [7] C °क्रमेव ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋणचक्रं प्रवक्ष्यामि षड्भेदेनापि पार्वति ।
साध्यार्ण[1]साधकार्णादि[2] व्यञ्जनस्वरभेदतः ॥ ४४ ॥
तावदङ्कास्तु संग्राह्या मातृकागणनाक्रमात् ।
साध्यनामत्रिगुणितं साधकेन समन्वितम् ॥ ४५ ॥
सप्तभिस्तु हरेद्भागं तदन्यद्विपरीतकम्[3] ।
पूर्वाङ्कवैपरीत्येन ऋणि[4]धनविशोधनम् ॥ ४६ ॥
यस्या[5]धिकाङ्को देवेशि स एव हि ऋणी मतः ।
न्यूनाङ्को यस्य देवेशि स धनी परिकीर्त्तितः ॥ ४७ ॥
साधकस्य धनित्वं च विद्यायास्तु ऋणित्वकम् ।
गुणनं नि[6]र्धनं वापि त्रिभिर्वा सप्तभिश्च वा ॥ ४८ ॥
त्रिसप्तव्यत्यय[7]त्वेन नियमः परिकीर्त्तितः ।
यत्र द्वाभ्यां वर्धनं तु गजैस्तत्र तु भेदनम् ॥ ४९ ॥
शून्यं दृष्ट्वा[8] न भागोऽस्ति संक्षेपादिदमीरितम् ।
वर्धनं तु त्रिभिर्यत्र सप्तभिर्भेदनं ततः ॥ ५० ॥
यत्राष्टभिर्भेदनं तु तत्र द्वाभ्यां तु वर्धनम् ।
मन्त्रसाधकयोर्वर्णान् गणनाविधिपूर्वकम् ॥ ५१ ॥
भिन्नान् कृत्वाऽथवा देवि स्वरव्यञ्जनभेदतः ।
साध्यनामद्विगुणितं साध[9]केन समन्वितम् ॥ ५२ ॥
अग्निभिस्तु हरेद्भागं तदन्यद्विपरीतकम् ।
मन्त्रसाधकवर्णानां पञ्चाशन्मातृकाक्रमात् ॥ ५३ ॥
कियत्तमो भवेद्वर्णस्तावदङ्कांस्तु संहरेत् ।
स्वरव्यञ्जनभेदेन अथवा वर्णमात्रकम् ॥ ५४ ॥
तावदङ्कास्तु कर्त्तव्या वर्णानामुभयोरपि ।

[1] D N °र्णान् । [2] D N °र्णान् । [3] B °का, C °कं । [4] B °णं । [5] D यद्य° । [6] B व° । [7] C °लप° । [8] D °न्याष्टं वा । [9] N मास° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मंत्रार्णान्[1] त्रिगुणीकृत्य साधकेन समन्वितम् ॥ ५५ ॥
सप्तभिस्तु हरेद्भागं तदन्यद्विपरीतकम् ।
अन्यत्र तु प्रकरणात् गुणनं[2] भाजनं भवेत् ॥ ५६ ॥
इ[3]ष्टाङ्कत्वेन गुणनं भाजनं चात्र कीर्त्तितम् ।
यथाङ्कक्रमयोगेन कीर्त्तितं तु मया तव ॥ ५७ ॥
नामाक्षरं समारभ्य यावन्मंत्रादिमाक्षरम् ।
त्रिधा कृत्वा स्वरैर्भियात्तदन्यद्विपरीतकम् ॥ ५८ ॥
मन्त्राद्यक्ष[4]रमारभ्य यावन्नामाक्षरं शिवे ।
सप्त कृत्वा त्रिधा भियात्तदन्यद्विपरीतकम् ॥ ५९ ॥
मातृकावैपरीत्येन मंत्रं नामाक्षरात्मकम् ।
त्रिधा कृत्वा त्रिभिर्हत्वा मंत्रराशिरियं भवेत् ॥ ६० ॥
अन्यानि ऋणचक्राणि कीर्त्तितानि मया तव ।
भ[5]क्तिरूपं ऋणं देवि यथावदवधारय ॥ ६१ ॥
कोटितंत्रेषु गुप्तं च तदद्य प्रकटीकृतम् ।
पूर्वसेवानु[6]पङ्गेण भ[7]क्तिर्यत्र दृढा भवेत् ॥ ६२ ॥
स मंत्रस्तु ऋणी ज्ञेयो भक्तिरूपं ऋणं प्रिये ।
नो चेद्भक्तिः कथं देवि भक्तिरूपं ऋणं प्रिये ॥ ६३ ॥
इति क्रमेण संप्रोक्तं ऋणिधनविशोधनम् ।
ऋणं धनं च विज्ञाय नाम दद्यान्महेश्वरि ॥ ६४ ॥
अन्यथा नामदाने तु[8] नामानुरूपकं फलम् ।
न भवेत्परमेशानि भ्रष्टो भवति साधकः ॥ ६५ ॥
स मूर्खस्त्वं न जानाति देवे द्वेषपरः कलौ ।
सर्व[9]मेवं तु विज्ञाय नामाज्ञां दापयेद्गुरुः ॥ ६६ ॥

[1] D °र्णान् । [2] D भुवनं । [3] C द्र° । [4] C °द्यन्तर° । [5] B श° । [6] N °स्य चानु° । [7] B श° । [8] B °न । [9] D वर्षे°, B वर्णे° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दिव्यसिद्धमानवे तु फलं च उत्तरोत्तरम् ।

श्रीदेव्युवाच ।

नामदानं कथं कार्य्यं दर्शनेष्वपि षट्स्वपि ॥ ६७ ॥
षडाम्नायेषु देवेश तथा शाम्भवयुग्मके ।
पञ्चाम्नाये तथा वेदाम्नाये च परमेश्वर ॥ ६८ ॥
मेधासाम्राज्यदिव्यान्तःसाम्राज्येन महेश्वर ।
नामदानं कथं कार्यं तन्मे कथय शङ्कर ॥ ६९ ॥

श्रीशिव उवाच ।

रहस्यातिरहस्यं तु त्वया संपृच्छ्यते शिवे ।
अहं जानामि सा काली तारा जानाति नेतराः ॥ ७० ॥
ओघाः[1] किंचिच्च जानन्ति तत्रापि दिव्यरूपिणः ।
सर्वथा गोप्यतां देवि न वाच्यं यस्य कस्यचित् ॥ ७१ ॥
षट्चक्रं तत्र संप्रोक्तं चतुःसंज्ञाविधायकम् ।
प्रथमे वर्णवेधोऽस्ति स्वरवेधो द्वितीयके ॥ ७२ ॥
तृतीये शून्यवेधोऽस्ति चतुर्थे कूटवेधता ।
पञ्चमे गणवेधोऽस्ति षष्ठे चक्रेण किंचन ॥ ७३ ॥
षट्चक्राणि महेशानि चक्राण्यन्यान्यपि प्रिये ।
अन्यानि पञ्चचक्राणि एवं रुद्रविधानि च ॥ ७४ ॥
तत्र षट्चक्रमध्ये तु साध्य[2]सिद्धं सुसिद्धकम् ।
दैवतं च पराख्यं[3] च देवतादर्शनाभिधम् ॥ ७५ ॥
देवतादर्शनाख्येन नाम दद्यान्महेश्वरि ।
ओघत्रयस्थं[4] यन्नाम साधकस्य तथैव च ॥ ७६ ॥

[1] B C आद्याः । [2] D N °ध्यं । [3] C °रोक्षं । [4] C °त्वं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रसिद्धं नाम गृह्णीयात् प्रसुप्तो[1] येन जागृयात् ।
नामाद्यक्षरमारभ्य यावन्मंत्रादिमाक्षरम् ॥ ७७ ॥
त्रिगुणीकृत्य देवेशि स्वरव्यञ्जनभेदतः ।
मातृकागणनात्वेन यावद[2]ङ्को भवेच्छिवे ॥ ७८ ॥
एकीकृत्य साधकार्णे मिश्रितं सप्तधा[3] हरेत् [4] ।
नामराशिरियं प्रोक्ता मंत्रराशिरतोऽन्यथा ॥ ७९ ॥
ऋणिनामप्रदेयं च सुन्दरं सुमनोहरम् ।
दिव्यौघनाम भाग्येन गुरुणा दीयते यदि ॥ ८० ॥
सिद्धौघनाम देवेशि भाग्येन सिद्धिकारकम् ।
मानवौघाभिधं नाम ऋणी भाग्येन लभ्यते ॥ ८१ ॥
गुरुणालोकितः शिष्यः शिष्येणालोकितो गुरुः ।
ऋणिनामप्रदानेन मंत्रदोषनिवृत्तता ॥ ८२ ॥
पूर्णाभिषेकदीक्षायां नाम चैव प्रदापयेत् ।
मेधादीक्षादिसाम्राज्यदिव्यसाम्राज्यगोचरम् ॥ ८३ ॥
नाम देयं महेशानि सुन्दरं कल्पितं च वा ।
आदौ प्रसिद्धनाम स्यादलाभे कल्पितं च वा ॥ ८४ ॥
मंत्रारूढं च वा नाम विद्याढ्यं वा महेश्वरि ।
अन्यत्तद्दिनऋक्षात्तमुदयार्णक्रमेण च ॥ ८५ ॥
अथोदयार्णनित्याक्तं कालनित्याक्रमेण च ।
प्रोक्तं तद्युगनित्याक्तं वर्षनित्याक्रमेण च ॥ ८६ ॥
तदावरणनित्याक्तं संप्रदायक्रमेण च ।
काश्मीराख्ये सम्प्रदाये तद्विद्यामंत्रकल्पितम् ॥ ८७ ॥
गौडे कालान्तकं[5] नाम केरले सर्वगोचरम् ।
परस्परं विशोध्याथ नाम दद्यान्महेश्वरि ॥ ८८ ॥

[1] C सुप्तो च । [2] C ° दे ° । [3] B ° र्वथा । [4] N भवेत् । [5] D कलतिकं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नाथा[1]न्तं चाथ सिद्धा[2]न्तं पूर्वपञ्चकयोगतः ।
यदेव तु ऋणी भूयात्तदेव वरनामकम् ॥ ८९ ॥
ओघत्रयं महेशानि चोत्तरोत्तरसिद्धिदम् ।
दिव्यौघे चेत्समायाति दिव्यरूपः स जायते ॥ ९० ॥
सिद्धौघे चेत्समायाति सिद्ध[3]रूपसुसिद्धिदः ।
मानवौघे किन्नरेशः शाक्त[4]शास्त्रे विदं भवेत् ॥ ९१ ॥

श्रीदेव्युवाच ।

शाक्ताख्ये तु महादेव कथं नाम प्रदीयते ।

श्रीशिव उवाच ।

वैष्णवे गाणपत्ये च शैवे स्वायंभुवे तथा ॥ ९२ ॥
चान्द्रे पाशुपते चीने जैने कालमुखेऽपि च ।
वैदिकेऽपि महेशानि तदावरणगं च वा[5] ॥ ९३ ॥
तत्पर्यायनाम देयं द्वारादुत्तरतस्तथा ।
मूलान्तं[6] च तदन्तं च दद्यान्नाम महेश्वरि ॥ ९४ ॥
बालायां स्पर्शकाल्यां च स्पर्शताराविधौ शिवे ।
स्पर्शच्छिन्नाविधौ देवि चन्द्रषट्षोडशक्रमात् ॥ ९५ ॥
कला[7]क्रमान्महेशानि रक्तचण्ड्यां[8] तु तत्क्रमात् ।
दुर्वासा मन्वगस्त्यादि तथा स्वप्ना[9]वतीविधौ ॥ ९६ ॥
मधुमत्यां च दिव्यौघा[10] भिन्नरूपाः प्रकीर्त्तिताः ।
षोडश्यां च परायां च पराप्रासादकेऽपि च ॥ ९७ ॥
षड्विद्यायां शाम्भवे च गुरवो भिन्नरूपिणः ।
मालास्थं चाथ न्यासस्थं मूलरश्मिस्थमेव च ॥ ९८ ॥

[1] C °थो°। [2] C °द्धो°। [3] C D °द्धि°। [4] D शक्ति°। [5] B °गोचरं। [6] D °लगं। [7] B N स्वराः। [8] C °न्द्रां। [9] C सप्त°। [10] C °घां।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नामदाने विधिरयं मया प्रोक्तो महेश्वरि ।
सम्प्रदायक्रमेणैव शाम्भवे पूर्वमीरितम् ॥ ९९ ॥
यत्तत्र नोक्तं देवेशि यत् सिद्धमतकेऽपि च ।
यज्ज्ञेय[1]मत्र देवेशि चतुःखण्डक्रमेण च ॥ १०० ॥
पुनरुक्तिर्न मन्तव्या विद्याभेदाद्विशेषता ।
श्रीचूलिको[2]र्मिलाचक्रं राजादिपशुगोचरम् ॥ १०१ ॥
नवचक्राणि देवेशि कथ्यन्ते शृणु यत्नतः ।
केरलाख्यं च दशमं प्रत्येकं त्रिविधं भवेत् ॥ १०२ ॥
एतद्विवेचनं देवि संक्षेपात् कथ्यते शृणु ।
त्रैविध्यं चैव श्रीचक्रे क्रमं शृणु महेश्वरि ॥ १०३ ॥
अष्टोत्तरशतं संख्या श्रीचक्रे शक्तयः स्मृताः ।
चतुःपञ्चाशदेवात्र मध्यचक्रे क्रमो भवेत् ॥ १०४ ॥
शक्तिभि[3]र्नन्द[4]संख्याभिः कनिष्ठं परिकीर्त्तितम् ।
चूलिकाख्यं महेशानि त्रिविधं परिकीर्त्तितम् ॥ १०५ ॥
पञ्चाशत्पीठनाम्ना वा षड्त्रिंशज्जातिमध्यतः ।
दशविद्यारूपजातिगन्धभेदक्रमेण च ॥ १०६ ॥
कुलाकुलक्रमेणैव काश्मीरगौडभेदतः ।
अष्टकन्यासमायोगात् कनिष्ठं परिकीर्त्तितम् ॥ १०७ ॥
एत[5]त्क्रमं महेशानि यथावदवधारय ।
शक्तिमाहूय देवेशि कञ्चुकीं गृह्य पार्वति ॥ १०८ ॥
एकैकां कञ्चुकीं देवि शिवहस्ते प्रदापयेत् ।
वस्त्रग्रन्थिं तु निर्बध्य सामरस्ये नियोजयेत् ॥ १०९ ॥
ऊर्म्मिलाख्यमिदं देवि चूलाचक्रं शृणु प्रिये ।
शक्तिमाहूय यत्नेन[6] चू[7]लिकां गृह्य यत्नतः ॥ ११० ॥

[1] N चतस्र° । [2] B C N चूडाचो° । [3] D सप्तभि° । [4] B °व° ।
[5] B एवं । [6] N देवेशि । [7] C चो°, N वा° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कुम्भे संस्थाप्य सम्पूज्य शिवमाहूय सादरम् ।
यस्य यथा च संप्राप्ता सा तस्य चक्रमध्यगा[1] ॥ १११ ॥
चूलिकाख्यक्रमो देवि कथितः श्रीक्रमं शृणु ।
परस्परस्नेहयोगात् श्रीचक्रे विनिवेशनम् ॥ ११२ ॥
[2]केरलाख्यक्रमे देवि भिन्नं भिन्नं निवेशनम् ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ११३ ॥

इति श्रीशक्तिसङ्गममहातन्त्रराजे उत्तरभागे प्रथमखण्डे श्रीमदक्षोभ्यतारासंवादे ऋणिधनिचक्रविनिर्णयं नाम पञ्चमः पटलः ॥ ५ ॥

[1] C ° मा ।   [2] This line is absent in C.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

षष्ठः पटलः

श्रीदेव्युवाच ।

एतेषां च फलं देव कथयस्व ममाधुना ।

श्रीशिव उवाच ।

एतज्ज्ञानी महेशानि शिव एव न संशयः ॥ १ ॥
वयस्तम्भाकर्षणं च त्रैलोक्यवश्यता तथा ।
अञ्जनं तिलकं गुप्तिः पादुका गुटिका तथा ॥ २ ॥
वेतालयक्षिणीसिद्धिस्त्रिधावादस्तदु[1]त्तरम् ।
खेचर्य्यादिमहासिद्धिः परकायप्रवेशनम् ॥ ३ ॥
शापानुग्रहणं वाक् च कामरूपत्वमेव च ।
रसायनं च त्रैलोक्यं महेन्द्रादीन्द्र[2]जालिकम् ॥ ४ ॥
अणिमाद्यष्टकं देवि खड्गादृश्ये तथैव च ।
मूकान्धस्तब्धीकरणं संहारखड्गके तथा ॥ ५ ॥
पताकाद्वन्द्वयुद्धस्य जयो वन्ध्यात्वनाशनम् ।
पौरुषं च मनःस्थैर्य्यं रञ्जकः स्वर्णभैरवः ॥ ६ ॥
धनदा च तथा शास्ता पद्मा मधुमती तथा ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ॥ ७ ॥
गोपनीयं गोपनीयं गोपनीयं पुनः पुनः ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ८ ॥

श्रीदेव्युवाच ।

देवेश श्रोतुमिच्छामि रहस्यं परमं व[3]रम् ।

[1] D दम्भमु° । [2] N °दिक° । [3] D प° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्रीशिव उवाच ।

सर्वं विशेषतः प्रोक्तमथ कादिक्रमं शृणु ॥ ९ ॥
दिव्यसिद्धमानवेशमहाकालक्रमेण च ।
अतिकालकरालास्य[1]वीरनाथक्रमेण च ॥ १० ॥
पञ्चातिकाले नव च कराले दश[2] पार्वति ।
काल[3]त्रयं महाकाले नवभेदा गुरुक्रमात् ॥ ११ ॥
वीरनाथे शतं देवि गुरु[4]भेदः प्रकीर्त्तितः ।
नवनाथयुग्मभेदात् सिद्धेः[5] साम्यं कहे भवेत् ॥ १२ ॥
एतत्क्रमेण देवेशि दीक्षणं कादिसम्मते ।
अस्यामेव महेशानि शम्भोः प्राधान्ययोगतः ॥ १३ ॥
शाम्भवत्वं भवेद्देवि शिवोऽहं निर्गुणेति च ।
शक्तेः प्राधान्याच्छाक्तत्वं देवीरूपाहमेव सा ॥ १४ ॥
कालिकाहं महातारारूपाहं सर्वदैव च[6] ।
तद्द्वयाच्छैवशक्तिः स्यादिति संक्षेपतो मतम् ॥ १५ ॥
स्थित्वा दिव्यौघपानं च कीर्त्तितं परमेश्वरि ।
सिद्धौघे स्थापयित्वा तु पानं कुर्यान्महेश्वरि ॥ १६ ॥
मानवौघे समुत्थाय क्रमात् त्रितयमीरितम् ।
संगीभूत्वा तु चैतन्यं सहयोनिः कुलेश्वरि[7] ॥ १७ ॥
त्रिसर्जनोत्तरं देवि भद्रनाथस्य कीर्त्तितम् ।
वीरतृस्यु[8]त्तरं देवि चाति[9]कालमतक्रमः[10] ॥ १८ ॥
शक्तिपात्रं स्थाप्य भिन्नं दक्षिणामूर्त्तिसम्मते ।
शक्तिपात्रं च गृह्णीयात् वीरनाथमतं शिवे ॥ १९ ॥

[1] B °ख्य°। [2] C °र्श। [3] B C °ले। [4] C ग्रह°। [5] B D सिद्धि°, C शुद्धे। [6] D तम्। [7] B °रः, C °र, D °राः। [8] B D त्रिपू°, C तृष्णु°। [9] C वाभि°, B चान्ति°। [10] D क्रमेण तु, N क्रमात्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कुलचक्रं भवेत्काल्या[1]मकुलं[2] कालिकामनौ ।
कुलाकुलं च तारायां सम्प्रदायत्रयान्तरे ॥ २० ॥
दिव्यमार्गवीरमार्गपशुमार्गक्रमेण च ।
पूर्णाभिषेकयोगेन चाज्ञानाम प्रदापयेत् ॥ २१ ॥
पूर्णाभिषेको देवेशि हादिकादिक्रमेण च ।
कथ्यते देवदेवेशि श्रृणु सावहिता भव ॥ २२ ॥
शुभमासे शुभर्क्षे च शुभलग्ने शुभोदये ।
कालरात्रिदिने प्राप्ते वीररात्रिदिने तथा ॥ २३ ॥
मोहरात्रिदिने चैव महारात्रिदिने तथा ।
क्रोधरात्रिदिने देवि घोररात्रिदिने तथा ॥ २४ ॥
तारारात्रिदिने चापि अबलारात्रियोगजे ।
दारुणासङ्गमे वापि मकरे कुम्भसङ्गमे ॥ २५ ॥
विविक्तस्थानमासाद्य स्थानशुद्ध्यादिपूर्वकम् ।
पर्वते विपिने घोरे शून्यगेहे श्मशानके ॥ २६ ॥
एकलिङ्गे शिवावासे श्मशानाष्टककेऽपि च ।
चक्रपाणिगृहे नद्यां पुर्यां पीठाष्टके शिवे ॥ २७ ॥
पञ्चाशत्पीठमध्ये वा पुष्पिण्युत्सवकेऽपि च ।
गङ्गागर्भे तडागे च वेश्यावासे च सङ्गमे ॥ २८ ॥
कुलवृक्षवने वापि कदलीवनमध्यतः ।
अथ पूग[3]वने देवि नारिकेलवने तथा ॥ २९ ॥
कदलीमण्डपे दिव्ये वाटिकायां विचित्रिते ।
पालाशवनमध्ये च पुण्यक्षेत्रे विशेषतः ॥ ३० ॥
स्वैरिणीगृहमध्ये च कुट्टनीनर्त्तमण्डले ।
विशिष्टस्थानमासाद्य मण्डपं तत्र कारयेत् ॥ ३१ ॥

[1] D °द्देवि । [2] C कुलश्च, D मङ्गलं । [3] C अष्टयुग (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कलाहस्तं सूर्यहस्तं नवहस्तं महेश्वरि ।
पञ्चहस्तं महेशानि नवकुण्डीक्रमेण च ॥ ३२ ॥
अथवा एककुण्डाख्यक्रमेण परमेश्वरि ।
मण्डपं कारयेद्देवि मेरुसाधनमार्गतः ॥ ३३ ॥
श्रीमेरुमण्डपं देवि यथादीक्षानुसारतः ।
वितान[1]ध्वजभूषाढ्यं प्राकारपरिखैर्युतम् ॥ ३४ ॥
गोपुरैः संयुतं देवि नानातोरणमण्डितम् ।
तदग्रे परमेशानि पूजामण्डपमाचरेत् ॥ ३५ ॥
अष्टाष्टकत्रिक्रमेण[2] पञ्चपञ्चक्रमार्गतः ।
एतासां सन्निवेशो हि यथा भवति पार्वति ॥ ३६ ॥
तथा मण्डपमासाद्य अब्जानि[3] रचयेत्ततः ।
सहस्रकोष्ठ[4]जं देवि सर्वतोभद्रमाचरेत् ॥ ३७ ॥
तत्र चक्रं ताम्रपात्रे स्वर्णे रौप्ये च भूमिजे ।
वस्त्रे वा रचयेद्देवि तथा चक्रस्य तच्छृणु ॥ ३८ ॥
सर्वतोभद्रपीठं च देवपीठे प्रकीर्त्तितम् ।
एकाब्जं योगिनीपात्रे पञ्चाब्जं क्षेत्रपाल[5]के ॥ ३९ ॥
नवाब्जं गणपे प्रोक्तं बटुके लिङ्गभद्रकम् ।
विरच्य परमेशानि मेरुमण्डपमाचरेत् ॥ ४० ॥
मेरुसंसाधनं कर्म्म श्रीविद्योपासकस्य च ।
सकलं निष्कलं देवि द्विविधं मेरुसाधनम् ॥ ४१ ॥
दीक्षाङ्गत्वेन सकलं निष्कलं कामनाङ्गतः ।
श्रीविद्या कालिका तारा त्रिविद्योपासके शिवे ॥ ४२ ॥
मेरुसंसाधनं देवि दीक्षायां परिकीर्त्तितम् ।

[1] D विशिष्ट° । [2] D °कक्रमेणैव । [3] D N वज्राणि, C ऋज्वानि ।
[4] C °ट° । [5] C °जे, N °कं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एतद्भिन्ना[1] महेशानि नहि दीक्षा भवेत् क्वचित् ॥ ४३ ॥
श्रीविद्योपासकानां च पारम्पर्य्यक्रमं शृणु ।
आदौ बाला विनिर्दिष्टा[2] ततः पञ्चदशी मता ॥ ४४ ॥
तथा श्रीषोडशीविद्या पराविद्या तदुत्तरम् ।
ततश्चरणदीक्षा स्यान्निर्वाणदीक्षणं ततः ॥ ४५ ॥
ततः षट्शाम्भवाख्या च मेधादीक्षा तदुत्तरम् ।
अनुक्रमेण संयुक्ता मेधादीक्षाभिधा भवेत् ॥ ४६ ॥
अथ चैकतमा याति[3] ततः साम्राज्यदीक्षणम् ।
दिव्यसाम्राज्यमेधा[4] च तदनन्तरगा भवेत् ॥ ४७ ॥
विद्याराज्याभिधा देवि छिन्नाविद्याविधौ भवेत् ।
साम्राज्यं पारमेष्ठ्यं च बगलामनुगोचरम् ॥ ४८ ॥
श्रीविद्याङ्गा तु बगला ताराङ्गा छिन्नमस्तका ।
एतद्दीक्षोत्तरं देवि नान्या दीक्षास्ति कुत्रचित् ॥ ४९ ॥
बालया देहशुद्धिश्च ततो विद्याधिकारता ।
विद्याधिकारतां याते श्रीषोढोपासनं चरेत् ॥ ५० ॥
षोढाधिकारी देवेशि पञ्चषोढां न्यसेत्तनौ[5] ।
विन्यासी पञ्चषोढायाः पराविद्यां जपेत् सदा ॥ ५१ ॥
पराषट्कं ततो न्यस्य ततश्चरणाचिन्तनम् ।
ततो निर्वाणं विन्यस्य ततः शाम्भवमाचरेत् ॥ ५२ ॥
तत् षोढात्रितयं न्यस्य रश्मिचिन्तनमाचरेत् ।
श्रीरश्मि च परारश्मि द्वितयं विन्यसेत्ततः ॥ ५३ ॥
मेधादीक्षा समग्रा तु ततो भवति पार्वति ।
मेधोत्तरं महेशानि साम्राज्यमेधिकां न्यसेत् ॥ ५४ ॥
ततो दिव्याभिधां न्यस्य सदाशिवसमो नरः ।

[1] B C N °द्भिना । [2] D समुद्दिष्टा । [3] B वैकृतभावापि, N नैकतमां वापि, D वै कुतपा सापि । [4] D °भेदा । [5] B ° ततः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मेरुभेदादिविज्ञानं श्रीमहासिद्धशैवके ॥ ५५ ॥
कालिकाम्नायतंत्रे तु ऊर्ध्वाम्नाये प्रकीर्त्तितम् ।
अत्रापि देवदेवेशि कथ्यते चान्ति[1]मे विधौ ॥ ५६ ॥
कुण्डादि[2]रचना देवि तत्रत्यै[3]वं महेश्वरि ।
क्रमागतात्सूचितं[4] च प्रकृतं शृणु पार्वति ॥ ५७ ॥
पूर्वोक्तं मण्डपं कृत्वा नानाचित्रविचित्रितम् ।
घण्टानादविभूषाढ्यं दर्पणोदरसन्निभम् ॥ ५८ ॥
भूमिं कृत्वा महेशानि वक्ष्यमाणं समाचरेत् ।
विधाय चक्रं तन्मध्ये चक्रे कुम्भं निधाय तम् ॥ ५९ ॥
क्वाथोदकैः समापूर्याभिषिञ्चामि वदेन्मनुम् ।
क्रमागतसमाचारनिरते भक्तिशालिनि ॥ ६० ॥
विरच्य विपुलं चक्रं प्रतियोनिं तु षोडश ।
त्रिकोणानि विधायाथ मध्ये कुम्भं तु विन्यसेत् ॥ ६१ ॥
सौवर्णं राजतं ताम्रं काचं मार्त्तिकमेव वा ।
पूरितं क्षारितं येन क्वथितेनाक्षरौषधैः ॥ ६२ ॥
निक्षिप्य नवरत्नानि धान्यानि विविधानि च ।
हिरण्यानि सताम्राणि वासोभ्यामपि वेष्टयेत् ॥ ६३ ॥
रक्ताभ्यां चन्दनयुतं पनसाश्वत्थपल्लवैः ।
शतक्रतुलताबद्धैर्मातुलुङ्गफलान्वितैः ॥ ६४ ॥
पि[5]धानकलशानन्यानन्येष्वेकै[6]कशो न्यसेत्[7] ।
सार्धं सहस्रं त्रिंशच्च षष्टिसंख्या क्रमोदिता ॥ ६५ ॥
मध्यचक्रेषु तोयादि कृत्वा बाह्याधिपूज्य च ।
कालात्म[8]नित्यामंत्रांश्च जपित्वा पूर्ववासरे ॥ ६६ ॥

[1] C N ॰न्त॰ । [2] B ॰नां । [3] B ॰त्ये, D चै॰ । [4] B रुधिरं । [5] B वि॰ । [6] C ॰ष्टेष्टकै॰ । [7] D ॰ऽन्यथा । [8] D N ॰शे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालात्म[1]नित्यामंत्राश्च कादावपि महेश्वरि ।
कादौ श्रीचक्रस्थाने च[2] कालीचक्रं महेश्वरि ॥ ६७ ॥
त्रि[3]कोणाद्येषु भेदेषु समता परिकीर्त्तिता ।
तारायां कालिकास्थाने ताराचक्रं महेश्वरि ॥ ६८ ॥
कालात्मनित्यास्थाने च वाग्देव्यङ्गार्णदेवता ।
सर्वत्र समता प्रोक्ता सर्वं तु कादिवद्भवेत् ॥ ६९ ॥
जन्मर्क्षे प्रातरुत्थाय स्वनित्यां तत्र पूजयेत् ।
काल्यां ताराविधौ देवि नित्यास्थाने मनुं जपेत् ॥ ७० ॥
सहस्रं प्रजपेत्पश्चात्[4] होमं कृत्वा समन्ततः ।
तत्पूर्वं षोडशाह्यानि प्रायश्चित्तं समाचरेत् ॥ ७१ ॥
षष्टिजपः कालनित्यानामपारायणं तथा ।
मंत्रपारायणं देवि चक्रपारायणं तथा ॥ ७२ ॥
यंत्रपारायणं देवि स्वयं वा स्वगुरुश्च वा[5] ।
दिनतो वारतः पक्षान्मासात्षट्त्रिंशता दिनैः ॥ ७३ ॥
सन्ध्याचतुष्टयं हादौ कादौ युग्मे[6] त्रयी भवेत् ।
प्रायश्चित्तं समाचर्य्य सामग्रीमष्टकार्च्चने ॥ ७४ ॥
कृत्वा संस्थाप्य यत्नेन विद्योक्तं तिलकं चरेत् ।
शृङ्गकाहलशङ्खादिवाद्यसङ्गीतनर्त्तनैः ॥ ७५ ॥
मुदितैर्योगिनीवृन्दैरेकैकं देवतात्मभिः ।
वृतैः सम्पूजितैः सार्द्धमभिषिञ्चेद्गुरुः स्वयम् ॥ ७६ ॥
षोढाभिषेकमंत्रैश्च कह[7]हादिक्रमोदितैः ।
मूलभेदैश्च वा देवि सहस्रमभिषेचयेत् ॥ ७७ ॥
कालचक्रं रौप्यजं च तत्र चक्रं सुवर्णजम् ।

1 D N °शे। 2 B संस्थाने। 3 C °त्रै°। 4 B °नित्यां।
5 B °रेत्। 6 C युग्मे कर्म°। 7 D हादि°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

महापात्रे तु संस्थाप्य विद्यां तत्राभिषेचयेत् ॥ ७८ ॥
विद्या[1]जलैर्महेशानि गुरोश्च कृपया युतः[2] ।
अभिषिच्य प्रयत्नेन चक्षुष्मत्यादि सा[3]न्तकम् ॥ ७९ ॥
सम्प्रदायत्रयेणैव शिष्यं स्वस्तिकमण्डले ।
संस्थाप्य सिच्य यत्नेन तदङ्के जपपूर्वकम् ॥ ८० ॥
देवीरूपं शिष्यतनुं कलशस्याक्षरैः सह ।
परकायक्रमेणैव जीवकीटक्रमेण च ॥ ८१ ॥
भृङ्गित्वं याति देवेशि तज्जीवं पुत्तलीतनौ ।
स्थाप्य शिष्यं बोधयेच्च ब्रह्मानन्दपरायणः ॥ ८२ ॥
जीवः कीटः पुरा[4] भूत्वा भृङ्गित्वमभिगच्छति ।
ततः षट्चक्रभेदं च कृत्वा तद्रसभुग्भवेत् ॥ ८३ ॥
तत्प[5]रागं महेशानि स्थापितं यंत्रपीठके ।
तेन[6] मंत्रान् लिखेत्तत्र तस्योच्चारणमाचरेत् ॥ ८४ ॥
भृङ्गावली तेन याति चक्र[7]मंत्रार्ण[8]योगतः ।
मंत्रवर्णान् चक्रवर्णान् कियत्संख्यानि कानि वै ॥ ८५ ॥
एतद्विभाव्य गणयेत्तावदंशप्रपूर्णता ।
जीवकीटस्ततो भृङ्गी ततस्त्वेवं[9] चराचरम् ॥ ८६ ॥
तेन भृङ्गावली नाम योगिनामपि दुर्लभा ।
क्रमदीक्षायुतानां च भृङ्गित्वं सुलभं[10] क्रमात् ॥ ८७ ॥
मंत्ररूपो भवेत्तेन सम्प्राणमेधा प्रकीर्त्तिता ।
स्वयं शक्तिस्तद्द्वयं च शक्तिस्वक्रमयोगतः ॥ ८८ ॥
शैवशाक्ते शाक्तशैवे तद्द्वयक्रमयोगतः ।
चक्राणि चैवं विज्ञाय उक्तमार्गेण पार्वति ॥ ८९ ॥

1 B °जा° । 2 B पुनः । 3 D °गा०, C N °शा° । 4 N परा° ।
5 B भङ्गप°, D तत्पा° । 6 B जिन° । 7 N °क्रे । 8 B °न्त° ।
9 B D °स्तेन । 10 C भक्तया ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चक्राणि चैव निर्भिद्य स्वरूपं तत्स्वरूपकम् ।
न कीटत्वं न भृङ्गित्वं स्वरूपेणैव देवता ॥ ९० ॥
देवतारूपभावे[1]न क्षणात्तद्रूपता भवेत् ।
आदौ तु पुत्तलीं कृत्वा तत्र जीवं प्रविन्यसेत् ॥ ९१ ॥
ज्ञात्वा तु[2] प्रत्ययं देवि ततश्च संयतेत् शिवे ।
कलौ पापसमाकीर्णे न समाधिर्न योगता ॥ ९२ ॥
यदि योगो भवेद्देवि नहि तत्र फलं भवेत् ।
तस्मात्कारणतो देवि मंत्रयोगं समभ्यसेत् ॥ ९३ ॥
स्वक्रमं सोऽपि कथयेत्तदा प्रभृति सोऽपि तम् ।
अनुतिष्ठेदविच्छिन्नं पर्य्यायं तस्य विच्युतौ ॥ ९४ ॥
सहस्रं प्रजपेद्विद्यां अभिषेकसमन्वितः ।
दिनषोडशकं वापि नवरात्रं च वा प्रिये ॥ ९५ ॥
पञ्चरात्रं त्रिरात्रं च यथावत्साधयेद्ध्रुवम् ।
चक्षुष्मत्यादि मेधान्तं पूर्वं संसाधयेद् ध्रुवम् ॥ ९६ ॥
सर्वे मंत्राः प्रयोक्तव्याः षडाम्नायादिभेदजाः ।
अष्टादशाम्ना[3]यमंत्राः कादिहादिक्रमेण च ॥ ९७ ॥
षट्दर्शनाभिधा मंत्रा दशविद्या[4]प्रभेदजाः ।
ते सर्वे चात्र द्रष्टव्याः श्रोतव्याः केचन प्रिये ॥ ९८ ॥
जप्तव्याः केऽपि[5] देवेशि दीक्षायोगोऽत्र कारणम् ।
एवं संप्राप्तयोगो हि शिवरूपो भवेन्नरः ॥ ९९ ॥
चक्षुष्मती वाग्मती च स्पर्शनित्या[6] महेश्वरि ।
वर्णदीक्षा क्रिया[7]दीक्षा तथैव च कलावती ॥ १०० ॥
पञ्चायतनिका चैव तथा वेधमयी[8] शिवे ।

[1] N °भेदे°। [2] C तत्। [3] B षडाम्ना°। [4] C °दविशेष°।
[5] D °चित्। [6] B °निधौ, C °नश्री। [7] C क्रमा°। [8] B °यो, C °ती।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वेधः पञ्चविधो देवि पूर्वमेव प्रकाशितः ॥ १०१ ॥
पूर्णदीक्षा महेशानि ऊर्ध्वाम्नायमयी तथा ।
निर्वाणदीक्षा देवेशि तथा शाम्भवभेदजा ॥ १०२ ॥
वेदबाणपशुपतिक्रमयोगेन वै कहे ।
मेधा साम्राज्यमेधा च दिव्यसाम्राज्यरूपिणी ॥ १०३ ॥
एतद्युक्तः केरलस्तु संक्षेपेण प्रकाशितः ।
चक्षुष्मत्यादि-ऊर्ध्वान्ता काश्मीरे[1] परिकीर्त्तिता ॥ १०४ ॥
चक्षुष्मत्यादिपूर्णान्ता गौडी दीक्षा प्रकीर्त्तिता ।
षष्टितत्त्वाष्टसिद्धिश्च क्रमेण परिकीर्त्तिता ॥ १०५ ॥
महाकालकलारन्ध्रबाणतत्त्वादिपात्रयुक् ।
दशाङ्गांश्चाष्टपञ्चांगान् पूर्वमेव मयेरितान् ॥ १०६ ॥
तृतीयखण्डे देवेशि सर्वमेतत्प्रकीर्त्तितम् ।
मनोरथमयी सिद्धिः साम्राण्मेधाविधौ भवेत् ॥ १०७ ॥
अथवा षण्णवत्यष्टकलशांस्तत्र विन्यसेत् ।
तेषु शक्तीः समावाह्य सम्पूज्यैवाभिषेचयेत् ॥ १०८ ॥
एकान्तसफलं जन्मदिने कृत्वाभिषेचयेत् ।
नाथैस्तत्त्वैश्च नित्याभिः कालनित्यान्तविद्यया ॥ १०९ ॥
आधारे हृदये शीर्षे वह्नौ सूर्य्ये निशाकरे ।
ध्यायन् त्रिसन्ध्यं प्रजपेत् सर्वगं व्यञ्जनं स्वरम् ॥ ११० ॥
न्यसेच्च मातृकास्थाने तथा तद्देहसिद्धये ।
ग्रहाणां[2] वैपरीत्येषु जन्मर्क्षे ग्रहणे द्वयोः ॥ १११ ॥
कुहुप्राप्तौ[3] रिपु[4]क्लेशे कुर्य्यादेवाभिषेचनम् ।
तेन दोषाः स्पृशन्त्येनं न कदाचिन्न तद्बलात् ॥ ११२ ॥
क्षुद्राणि क्रूरकर्म्माणि कृत्याश्च रिपु[5]कल्पिताः ।

[1] B °रो, N °री। [2] C ग्रहणं, B ग्रहाणां। [3] C °मासौ। [4] B पुंसः। [5] D विप्र°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्रीदेव्युवाच ।

बलं कथं भवेदस्य सेकस्य परमेश्वर ॥ ११३ ॥
ब्रूहि मे तद्बलं येन क्लेशा नश्यन्त्यशेषतः ।

श्रीशिव उवाच ।

सोमसूर्य्याग्निरूपेण जलेन स्पर्शयोगतः ॥ ११४ ॥
नश्यन्त्यशेषदोषास्तु तस्मात् सेकसमो नहि ।
सोमसूर्य्याग्निरूपत्वं जलस्य परिकीर्त्तितम् ॥ ११५ ॥
तस्मादशेषदुःखार्तिशान्त्यै स्यादभिषेचनम् ।
सप्तसूक्तेषु[1] कालेषु पुण्ये[2]ष्वन्येषु चादरात् ॥ ११६ ॥
कुर्य्यात्सदक्षिणां पूजां गुरोः प्रत्यक्षमेव वा ।
उक्तेषूत्थान[3]जातेषु पूजयेत्स्वर्णपुष्पकैः ॥ ११७ ॥
अभिषिक्तस्तु विधिना प्रदद्याद्दक्षिणां गुरोः ।
गुरुं तदग्रतः प्राप्तविद्यं तदनुजं तथा ॥ ११८ ॥
गुरोर्गुरुं तद्गुरुं च स्वग्र[4]तो लब्धविद्यकान् ।
प्रणामपूजास्तवनसेवा[5]दिभिरुपासनैः ॥ ११९ ॥
तोषयेदन्यथा शक्तिः स्वीया तद्गा[6]मिनी भवेत् ।
बहुचन्दनकाश्मीररत्नकस्तूरिकायुतैः ॥ १२० ॥
पङ्कै[7]र्विदध्यात् सर्वत्र गुरुपादद्वयं शिवे ।
प्रतिवर्षं महेशानि कुर्य्यादेवाभिषेचनम् ॥ १२१ ॥
पूर्णाभिषेकयुक्तो हि ऊर्ध्वाम्नायादि चाष्टकम् ।
गुरुं प्राप्य महेशानि तद्दीक्षायै पठेत्स[8]दा ॥ १२२ ॥
इति संक्षेपतः प्रोक्ता मेधादीक्षा महेश्वरि ।

[1] C °क्तं तु, D संप्रयुक्तेषु । [2] D अन्ये° । [3] D स्त्यात्र° (?), N °पात°, B °तात° । [4] D °र्ग° । [5] B °का° । [6] B °द्धा° । [7] D °को । [8] C °व तत्स° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कादिक्रमे महेशानि कथ्यते शृणु साम्प्रतम् ॥ १२३ ॥
सर्वव्यापकरूपं च[1] शक्ति[2]ज्ञानं महेश्वरि ।
परम्परात्परं[3] देवि तत्र देवि द्विधा मतम् ॥ १२४ ॥
काद्यं हाद्यं महेशानि काद्यं कालीमतं भवेत् ।
हाद्यं श्रीत्रिपुराख्यं च कहाख्यं तारिणीमतम् ॥ १२५ ॥
यः कश्चिन्मन्त्रजापी तु तत्र काली वरप्रदा ।
भाषाभेदाः शाबराणां[4] मंत्रमात्रे महेश्वरि ॥ १२६ ॥
वरदानाधिकारो हि कालिकायाः प्रकीर्त्तितः ।
एतत्कथाविस्तरस्तु कादिहादिविनिर्णये ॥ १२७ ॥
पूर्वं विस्तरतो देवि मया तत्परिकीर्त्तितम् ।
उभयत्र भवेन्मेधाभेदः पारायणे क्वचित् ॥ १२८ ॥
कादौ स्पर्शमणिर्देवि तथा चिन्तामणिः प्रिये ।
सिद्धकाली महाविद्याराज्ञी कामकला ततः ॥ १२९ ॥
हंसकाली गुह्यकाली वेदपञ्चरसक्रमात् ।
शाम्भवं परमेशानि क्रमान्मेधा प्रकीर्त्तिता ॥ १३० ॥
[5]उभयक्रमतो देवि सम्राण्मेधा प्रकीर्त्तिता ।
नाडीपारायणं नाम मन्त्रपारायणं तथा ॥ १३१ ॥
चक्रपारायणं देवि पूर्णोर्ध्वाम्नाय एव च ।
चरणस्तुर्य्यचरणस्तथा षट्शाम्भवः[6] शिवे ॥ १३२ ॥
मेधा साम्राज्यमेधा च क्रमेण परमेश्वरि ।
तत्प्रश्नविद्याजन्मादिवर्षदे[7]शाल्य[8]जातके ॥ १३३ ॥
कालनित्या कालचक्रं उभयत्र समं भवेत् ।
तद्द्वयोक्तशिवः प्रोक्तः साक्षात्परशिवो भवेत् ॥ १३४ ॥

[1] B °पत्वं । [2] C शाक्त° । [3] N °रां । [4] D सर्ववाणी । [6] D N °वं, C °वे ।
[5] This line is dropped on both B and N.
[7] N °द° । [8] D °ह्य° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शिवदेवीवटेशाख्य[1]स्तथा चानन्दभैरवः ।
केरलश्चैव काश्मीरो गौडचैतन्यगः शिवे ॥ १३५ ॥
प्रत्येकं तु निगदितं सम्प्रदायचतुष्ककम्[2] ।
आज्ञानाम योगपट्टः क्रमेण दापयेद्गुरुः ॥ १३६ ॥
अवधूतः सर्वगः स्यात् पूर्वोक्तनिर्णयो ह्ययम् ।
कापालिके पञ्चभेदाश्चण्डे भेदद्वयं भवेत् ॥ १३७ ॥
स्वायम्भुवे त्रयं देवि कौले चाष्टौ प्रकीर्त्तिताः ।
वीरे पञ्च महेशानि वैष्णवे दश पार्वति ॥ १३८ ॥
गाणपेऽष्टौ महेशानि जैने[3] शतद्वयं[4] भवेत् ।
सौरे पञ्च महेशानि बौद्धानां शतमात्रकम् ॥ १३९ ॥
दश पाशुपते प्रोक्ता मुण्डी त्रिंशन्महेश्वरि ।
केरलश्चैव काश्मीरगौडभेदेन पार्वति ॥ १४० ॥
केरले भावना प्रोक्ता काश्मीरे चानुकल्पनम् ।
गौडे प्रत्यक्षदानं च चक्र[5]त्रितयमीरितम् ॥ १४१ ॥
केरले त्रितयं देवि **वटवासि**[6]मते शिवे ।
गुप्तोग्रकेरले देवि शुद्धकेरलके तथा ॥ १४२ ॥
तद्द्रव्यभावना देवि सर्वान्ते परिकीर्त्तिता ।
त्रिधा केरलमेतद्धि वटवासिमते शिवे ॥ १४३ ॥
एतद्भेदा महेशानि **तारासूक्ते** प्रकाशिताः ।
दिव्यौघैर्महेशानि प्रसौ पञ्च प्रकीर्त्तिता ॥ १४४ ॥
आराध्य कलहट्टौ[7] च पुष्पचक्री तथैव च ।
जीवचक्री महेशानि सम्प्रदायान्तरं श्रृणु ॥ १४५ ॥
दशावतारपूर्वत्वं चैतन्यस्तदनन्तरम् ।
ब्रह्मादिपदपूर्वत्वं पञ्चाशदीश्वरान्तकम् ॥ १४६ ॥

[1] B वटेशानि । [2] B °ला । [3] D N वीरे । [4] D °त्रयं ।
[5] B क्रम° । [6] B °स्वामि° । [7] B °हादौ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पञ्चाशदीश्वराद्यं च चैतन्यान्तं महेश्वरि ।
पञ्चाशत् केशवाद्यं च गणपाद्यं तथैव च ॥ १४७ ॥
त्रिपुराद्यं महेशानि कामाद्यं परमेश्वरि ।
रत्या[1]द्यं वा महेशानि छिन्नाद्यां तु विशेषतः ॥ १४८ ॥
डाकिन्याद्यं तथा देवि भैरवाद्यं च वा भवेत् ।
नृसिंहाद्यं च चैतन्यं किं वा[2] देशपरंपरा ॥ १४९ ॥
कलहट्ट[3]स्त्वाततायी गोमुखी वल्लभस्तथा ।
विज्ञानी वामविज्ञानी तथैव सिद्धदीक्षितः ॥ १५० ॥
विद्याराट् च विराट् स्वामी[4] सम्राणमण्डलमेव च ।
एते देशपरं याता महासिद्धिप्रयोगजाः ॥ १५१ ॥
सम्प्रदायविहीनानां कुलशास्त्रप्रयोजनात् ।
सर्वगर्हित इत्युक्तो भैरवाख्यः[5] प्रकीर्त्तितः ॥ १५२ ॥
वेदबाह्यो यथा प्रोक्तस्तथैवायं प्रकीर्त्तितः ।
एतद्देशपरं यातास्त्वन्यान् शृणु हि पार्वति ॥ १५३ ॥
तारावती भोगवती तथैव विमलावती ।
प्रज्ञा[6]वती मधुमती तथा प्रज्ञावती मता ॥ १५४ ॥
उद्भटाम्बावती देवि एते चार्हत[7]भेदजाः ।
अनुग्रहाख्यश्चैतन्यस्तथैव निग्रहाभिधः ॥ १५५ ॥
निग्रहानुग्रहाख्यश्च[8] राजचैतन्य एव च ।
कला[9]चैतन्यनामा च श्रीचैतन्यस्तथा शिवे ॥ १५६ ॥
दिव्यचैतन्यको देवि तथा प्रज्ञानवाचकः ।
शाम्भवाख्यस्तु चैतन्यो विज्ञानाख्यस्तथैव च ॥ १५७ ॥
परा[10]चैतन्यनामाख्यस्त्वा[11]त्मचैतन्य एव च ।

[1] B °सा° । [2] B सिद्धा । [3] C °स्त° । [4] C °ड्भीमी ।
[5] D C वैरबाह्यः । [6] D व्रह्मा° । [7] C N °र्हन्त° । [8] C °हश्चैव ।
[9] C °लौ । [10] C पाश्च° । [11] C °व्यस्ता° ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वैराजाख्यश्च चैतन्यः श्रीचैतन्यस्तथैव च ॥ १५८ ॥
प्रज्ञाचैतन्यनामा च प्रासादाख्यस्तथैव च ।
निर्वाणाख्यस्तु चैतन्यो मेधाचैतन्य एव च ॥ १५९ ॥
अथ शाम्भवचैतन्यः श्रीचैतन्यस्तथैव च ।
विद्याचैतन्यनामाख्यः सिद्धचैतन्य एव च ॥ १६० ॥
एते काश्मीरमार्गस्थास्त्रिपुरा कादिभेदतः ।
रङ्गवारो देववारो मायादेवस्तथा शिवे ॥ १६१ ॥
काला[1]ख्यश्चैव काञ्चीशो ब्रह्मवारस्तथापरः ।
राजवारः सिद्धवारो विश्वरूपस्तथापरः ॥ १६२ ॥
उन्मत्तभैरवाख्यस्तु वाक्शक्तिः काव्यसिद्धियुक् ।
भूतभैरवनामाख्यो मूर्त्तिस्फोटश्च विग्रहः ॥ १६३ ॥
विराट्भैरवनामाख्यो मूर्त्तिचालनवाक्परः ।
स्वराट्भैरवनामाख्यो वाञ्छात्राक्सिद्धिगोचरः ॥ १६४ ॥
सम्राट्भैरवनामाख्यः सर्वरूपत्वसिद्धियुक् ।
श्रीमद्बटुकनामाख्यः शापानुग्रहकृत् कलौ ॥ १६५ ॥
सर्वत्र सर्वरूपत्वमानन्दभैरवे भवेत् ।
असि[2]ताङ्गो वाक्पर[3]श्च तथैवाञ्जनयुक् शिवे ॥ १६६ ॥
रूपभेदकल्पनाख्य[4]सिद्धिर्गुप्तिस्तथैव च ।
परकायप्रवेशश्च खेचरी चण्डभैरवे ॥ १६७ ॥
अन्यथासृष्टिकरणं क्रोधाख्ये सम्प्रदायके ।
इन्द्रजालमहेन्द्रादि कपालभैरवे भवेत् ॥ १६८ ॥
नदीसमुद्रशो[5]षादिभीषणाख्यप्रदायके ।
एते भेदा वीरचक्रे केरले शृणु पार्वति ॥ १६९ ॥

[1] B D N °मा°। [2] C °शि°। [3] C D °व°। [4] C रुद्रभेदे केरलाख्य°। [5] B °घो°।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दिव्यबोधा[1]नन्दनथाः कलानाथान्तवाचकः ।
केवलं नन्दनाथाख्यः केवलं नामवाचकः ॥ १७० ॥
एकस्मिन् त्रितयं देवि क्रमेण योज्यते शिवे ।
मानवाख्यस्त्रयान्तो हि सिद्धचैतन्यवह्नि[2]युक् ॥ १७१ ॥
दिव्यचैतन्यगुणयुक् दिव्यप्रज्ञानमेव च ।
गुणयुक् परमेशानि नाथानन्दक्रमेण च ॥ १७२ ॥
नन्दनाथो महेशानि मिलित्वा बाणसंख्यकः ।
चैतन्यान्तो विलासाढ्यो बाणसंख्याप्रवाचकः ॥ १७३ ॥
[3]सिद्धचैतन्यनामा च पञ्चधा पूर्ववत् प्रिये ।
सिद्धाद्य[4]श्च विलासान्तो बाणसंख्याप्रवाचकः ॥ १७४ ॥
सत्याद्यो हि विलासान्तो बाणसंख्याप्रवाचकः ।
[5]सिद्धप्रज्ञो महेशानि बाणसंख्याप्रवाचकः ॥ १७५ ॥
ऋ[6]द्धिचैतन्यनामाख्यो बाणसंख्याप्रवाचकः ।
अणिमाद्यष्टपूर्वत्वमेतदन्तं महेश्वरि ॥ १७६ ॥
चत्वारिंशत्प्रभेदाश्च मातृकाक्रमतोऽपि च ।
चत्वारिंशत्प्रभेदाश्च क्रमेण परमेश्वरि ॥ १७७ ॥
ओघत्रयं द्वैतमध्यं तदन्ते तु सरस्वती ।
शाम्भवाद्यं मध्यपूर्वं सरस्वत्यन्तकं शिवे ॥ १७८ ॥
बाणमेधा मध्यपूर्वं तदन्ते च सरस्वती ।
एवं क्रमेण देवेशि दशभेदाः प्रकीर्त्तिताः ॥ १७९ ॥
चिन्मेधा चैव चित्प्रज्ञा श्रीनाथश्च तदन्तरम् ।
सम्प्रदायत्रयं देवि बाणसंख्याप्रवाचकम् ॥ १८० ॥
सारस्वतपदं पूर्वं तदन्ते सुन्दरी शिवे ।

[1] C ॰भेदा॰ [2] D ॰सिद्धि॰। [3] Three lines from here are omitted in B D. [4] C सप्ताद्य॰। [5] C omits this line. [6] B द्व॰।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

निग्रहाख्यं पदं पूर्वं तदन्ते तु सरस्वती ॥ १८१ ॥
सुन्दर्यन्तं च सिद्धाद्यं शापानुग्रहकारकम् ।
सुन्दर्य्यन्तं महेशानि काला[1]द्यं च सरस्वती ॥ १८२ ॥
साम्राज्याद्यं महेशानि तदन्ते तु सरस्वती ।
सौभाग्याद्यं महेशानि तदन्ते तु सरस्वती ॥ १८३ ॥
देवीपरम्परायां तु संक्षेपेण प्रकाशितम् ।
दिव्याद्यं श्रीविलासान्तं बाणसंख्याप्रवाचकम् ॥ १८४ ॥
दिव्याद्यं च महाप्रज्ञा बाणसंख्याप्रवाचकम् ।
सम्राट् वैराट् च स्वाराज्यमधिराज्यं च राज्यकम् ॥ १८५ ॥
महा[2]राज्यं पारमेष्ठ्यमाधिपत्यं तथैव च ।
सार्वभौमश्चक्रवर्ती शकानन्दस्तथैव च ॥ १८६ ॥
ब्रह्मानन्दश्चिदानन्दः पूर्णानन्दस्तथैव च ।
महासमरसानन्दो महानन्दस्तथैव च ॥ १८७ ॥
बाणक्रमेण देवेशि भेदानां नवतिर्भवेत् ।
बटुकस्य मतं प्रोक्तं नामानि सूचितानि च ॥ १८८ ॥
निरुक्तिश्च महेशानि दीक्षाभेदोत्तरं[3] शिवे ।
कथ्यते परमेशानि किमन्यत् श्रोतुमिच्छसि ॥ १८९ ॥

इति श्रीशक्तिसङ्गममहातन्त्रराजे उत्तरभागे प्रथमखण्डे श्रीमदक्षोभ्यमहोग्रतारासंवादे नामविवरणं नाम षष्ठः पटलः ॥ ६ ॥

[1] D °मा° । [2] C ब्रह्म ° । [3] N ° दान्तरं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal